Sāmba, son of Vāsudeva
Sāmbapañcāśikā
2 Saṃskaraṇa

काव्यमाला १३.

साम्बकविप्रणीता ।

साम्बपञ्चाशिका ।

क्षेमराजकृतया टीकया समेता ।

मूल्यं [illegible] आणकाः ।

KÂVYAMÂLÂ. 13.

THE SÂMBAPANCHÂSIKÂ

OF

SÂMBA.

WITH

The commentary of Kshemarâja.

EDITED BY

PAṆḌIT KEDÂRNÂTHA

AND

WÂSUDEVA LAXMAṆ SHÂSTRÎ PAṆASHÎKAR.

Second Edition.

PUBLISHED BY

TUKÂRÂM JÂVAJÎ,

PROPRIETOR "NIRṆAYA-SÂGAR" PRESS,

BOMBAY.

PRINTED BY B. R. GHÂNEKAR AT THE "NIRṆAYA-SÂGAR" PRESS,
FOR THE PUBLISHER.

1910.

Price [illegible] Annas.

काव्यमाला. १३.

साम्बकविप्रणीता

साम्बपञ्चाशिका।

क्षेमराजकृतया टीकया समेता।

जयपुरनिवासिसाहित्योपाध्यायपण्डितकेदारनाथशर्मणा
पणशीकरोपाह्वलक्ष्मणतनुजनुषा वासुदेवशर्मणा
च संशोधिता।

(द्वितीयावृत्तिः।)

तच्च
मुंबय्यां
तुकाराम जावजी
इत्येतेषां कृते तेषामेव निर्णयसागराख्ययन्त्रालये बालकृष्ण
रामचन्द्र घाणेकर इत्यनेन मुद्रयित्वा प्रकाशिता।

शाकः १८३२, खिस्ताब्दः १९१०.

मूल्यं रूप्यकपादः १.

काव्यमाला ।

श्रीसाम्बप्रणीता

साम्बपञ्चाशिका ।

राजानकश्रीक्षेमराजकृतया टीकया समेता ।

पुष्णन्देवानमृतविसरैरिन्दुमास्वाद्य सम्य-
ग्भानुः स्वामी रमयति रसं यः परं नित्यमेव ।
क्षीणं क्षीणं पुनरपि च तं पूरयन्योऽवनीर-
महोल्लासोल्लसितहृदयं नौमि चिद्भानुमेकम् ॥
एतदाचार्यसत्पादप्रोन्मिषद्धिषणा वयम् ।
विवृणुमो मनाक् श्रीमत्साम्बपञ्चाशिकास्तुतिम् ॥

---

१. इदं सूर्यस्तुतिमङ्गलवतो वासुदेवस्य पुत्रेण वृष्णिवंशभूषणेन श्रीसाम्बेन प्रणीतेति टीकाकारः प्रारम्भे समाप्तौ च वदति. वाराहपुराणे वैवस्वतमन्वन्तरगतसप्तमेऽध्याये—'ततः साम्बो महाबाहुः कृष्णात्मजो यशी पुरीम् । मथुरां मुक्तिफलदां रवेराराधनोन्मुखः ॥'—'साम्ब पञ्चाशकैः श्लोकैर्वेदगुह्यपदाश्रितैः । मत्स्तुतोऽहं त्वया वीर तेन तुष्टोऽस्मि ते सदा ॥' इत्यादिश्लोकैः साम्बस्य पञ्चाशच्छ्लोकात्मकरविस्तुतिनिर्माणं प्रतीयते. स्तुतिस्तु तत्र नास्ति. सा च कदाचिदियमेव स्यात्. २. अस्य टीकाकारो राजानकक्षेमराजस्तु कश्मीरेषु विक्रमाब्दीयैकादशशतकप्रारम्भे आसीत्. स्वोऽभिनवगुप्ताचार्यशिष्यत्वेन वर्णयति. ग्रन्थाश्चैतत्कृता एते ज्ञायन्ते—(१) परमार्थसंग्रहवृत्तिः, (२) प्रत्यभिज्ञाहृदयम्, (३) भैरवानुकरणस्तोत्रम्, (४) साम्बपञ्चाशिकाटीका, (५) तत्त्वचिन्तामणिवृत्तिः, (६) स्पन्दनिर्णयः(?), (७) स्पन्दसंदोहः(?), (८) स्वच्छन्दोद्योतः. इयं साम्बपञ्चाशिकाटीका प्रत्यभिज्ञाशास्त्रानुसारिणी वर्तते. तत्र प्रमाणत्वेन धृता एते—(१) आगमः, (२) कालिकाक्रमः, (३) क्रमस्तोत्रम्, (४) नन्दिशिखा, (५) नर्मशिखा, (६) भैरवानुकरणस्तोत्रम्, (७) विज्ञानभैरवः (८) शिवसूत्रम्, (९) श्रीपूर्वः, (१०) श्रुतिः, (११) स्वच्छन्दः. एतत्पुस्तकमस्मिन्पद्धिरस्माभिः पुस्तकद्वयमस्या उपलब्धम्. तत्र प्रथमं सटीकं शुद्धमेकोनविंशतिपत्रात्मकं केरलीयसदाशिवशास्त्रिभिः काश्मीरेभ्यः समानीतं कश्मीराक्षरम्, अपरं च जयपुरराजगुरुभट्टलक्ष्मीदत्तसुतश्रीद्वारकानाथशर्मणां संग्रहालयस्थं मूलमात्रं शुद्धं पत्रचतुष्टयात्मकं नागराक्षरं ज्ञेयम्. एतदाधारेणैतन्मुद्रणं संजातमिति शिवम्.

सोऽयं परामृतरसो रसज्ञैरिह रस्यताम्।
आयुष्याज्यामृतस्पर्शः शतपद्या हि शान्तये॥

समस्तागममहाम्नायरहस्यविन्महायोगी(गि)सहस्रसंप्रदायसंपूर्णः श्रीवासुदेवस्य भगवतः पुत्रः श्रीसाम्बः स्वात्मविवस्वत्स्तुतिं जगतोऽनुग्रहाय वक्तुमुपक्रमते—

शब्दार्थत्वविवर्तमानपरमज्योतीरुचो गोपते-
रुद्गीथोऽभ्युदितः पुरोऽरुणतया यस्य त्रयीमण्डलम्।
भास्वद्वर्णपदक्रमेरिततमः सप्तस्वराश्वैर्विय-
द्विद्यास्यन्दनमुन्नयन्निव नमस्तस्मै परब्रह्मणे॥ १॥

तस्मै परस्मै सर्वोत्कृष्टाय विश्वपूरणादिकर्त्रे च। अत एव चाभावशान्तब्रह्मचित्रब्रह्मादिसर्वब्रह्मक्रोडीकर्त्रे ब्रह्मणे बृहते व्यापकाय बृंहणाय च विश्वकर्त्रे चिदात्मने नमः। देहादिप्रमातृताप्रशमनेन तदेवाविशामीत्यर्थः। यस्य ब्रह्मणः संबन्धि ऊर्ध्वमशेषविश्वाभेदात्मतया उत्कृष्टतया गीयते विमृश्यत इत्युद्गीथः प्रथमोन्मेषात्मशब्दब्रह्मरूपः प्रणवो ध्वनिः। देवतास्तुतिकर्मप्रधानसामर्ग्यजुर्वेदाख्या त्रय्येव शाखा प्रपञ्चक्रोडीकृतसमस्ताम्नायवाक्यैकवाक्यताव्याप्त्या मण्डलम्। अतश्चैतत्सर्वासां विद्यानां मन्त्रशास्त्रविज्ञानानां स्यन्दनमास्पदं प्रसवकारणं च कर्मभूतं च वियत्पराकाशमुन्नयन्नुल्लासयंस्तन्मयत्वमापादयन्निव पुरः प्रथममरुणतयातिदीप्तत्वेनोदितः स्वयमुन्मिषितः। वियन्मयस्याप्यस्य दीप्तस्योन्मेषावष्टम्भपुरःसरं तथा स्फुरणादुन्नयन्निवेत्युक्तम्। एतच्च त्रयीमण्डलं भास्वद्भिः प्रोद्गीथारुणिम्ना स्फुरितैर्वर्णपदक्रमैरक्षरवाचकतदानुपूर्वीभिरीरितं ध्वस्तं तमोऽज्ञानं येन तादृक्। उच्चारणपदार्थवाक्यार्थप्रतिपत्तिषु परमचिदभेदविश्रान्तिदमित्यर्थः। केन वियदुन्नयन्। सप्त ये स्वराः स्वयं राजमाना विश्वाक्षेपिणो वर्णाः पश्यन्त्यादिप्रवर्तनप्राणितकल्पाः षड्जादिध्वनिविमर्शास्त एव सर्वत्राशुसंचारित्वादश्वास्तैः। यस्य ब्रह्मणः कीदृशस्य। गोपतेः परादिवाक्प्रभोर्मरीचिचक्रेश्वरस्य च। अत एव शब्दार्थत्वेन नानालौकिकेतरशब्दतदर्थतत्संबन्धैर्विचित्रतया वर्तमानं स्वातन्त्र्यादेतद्वैचित्र्याभासात्म यत्परं ज्योतिः शाक्तं वीर्यं तेन च रुग्दीप्तिर्यस्य। बाह्यस्यापि सूर्यस्य 'ज्ञानशक्तिः परा ह्येषा तपत्यादित्यविग्रहा' इत्याम्नायनीत्या परब्रह्मप्रतिबिम्बकल्पस्य प्रणवव्याप्तिकोऽरुणः पूर्वमुदितः। त्रयीव्याप्तिकं मण्डलमितरविद्याव्याप्तिकं स्यन्दनं च कर्म भास्वद्वर्णैः पदक्रमैर्देदीप्यमानचरणविन्यासैरीरिततमसो ये सप्तस्वरव्याप्तिका अश्वास्तैर्वियदुत्क्षिपति। अथ च विचित्रवाच्यवाचकात्मजगद्वृत्तेश्चिच्चक्रेश्वरस्योद्गीथः शक्त्यङ्कुरोन्मेषो दीप्तो ब्रह्मविष्णुरुद्रजाग्रत्स्वप्नसुषुप्तिब्रह्ममूलमायाण्डादित्रयीमण्डलम्। विपद्यापकम्। वेदनानादिधर्मस्य परमात्वबोधनेत्याद्याम्नायनिरुक्तोन्मनाशक्त्याख्या विद्यास्यन्दनं स्वरैर्विचित्रैर्मन्त्रैर्ध्वनिभिरुन्नयन्निव प्रथममुदितः। किं कृत्वा। भास्वतां

णांनामकारादिमात्राणां पदानां बिन्द्वादिविश्रान्तीनां क्रमेण परिशाट्या ईरितं तमः शमनान्तं पाशजालं यत्र ॥

एवं सामान्यव्याप्त्या परमार्कं स्तुत्वा देहस्थमध्यनाडीव्याप्त्या स्तौति—

ओमित्यन्तर्नदति नियतं यः प्रतिप्राणि शब्दो
वाणी यस्मात्प्रसरति परा शब्दतन्मात्रगर्भा ।
प्राणापानौ वहति च समौ यो मिथो ग्राससक्तौ
देहस्थं तं सपदि परमादित्यमाद्यं प्रपद्ये ॥ २ ॥

तं परमादित्यं परब्रह्मस्वरूपमेव देहस्थितं मध्यनाडीगतप्राणब्रह्मनिविष्टं आद्यं विश्वसर्गस्थितिमूलं सपदि प्रपद्ये अविलम्ब्यव्यवधानेन समाविशामि । कं तमित्याह—य ओमित्यन्तः कोडीकृताशेषशब्दनात्मनादरूपो महाप्रणवः प्रतिप्राणि सर्वभूतेषु नियतमविच्छिन्नप्रवाहेणान्तर्नदति परवागात्मस्वरूपं विमृशन्स्थितः । यस्माच्च शब्दतन्मात्रगर्भा आसूत्रितककारादि(कादि)क्षान्तशब्दराशिरूपमात्राविभागज्योतिर्मयी परा द्वितीया वाणी पश्यन्ती प्रसरन्त्युन्मिषति । यश्च मिथो ग्रासरसिकावन्योन्यकवलनपरौ समौ समानभूमिकापन्नौ प्राणापानौ वहति । उदानवह्निरूपमनिजमहाज्योतिर्मयौ करोति ॥

एवं महाव्याप्त्या सूक्ष्मव्याप्त्या चानवच्छिन्नं मध्यधामस्थं च चिदर्कं स्तुत्वा प्रत्यगात्मव्याप्त्यापि स्तौति—

यस्त्वक्चक्षुःश्रवणरसनाघ्राणपाण्यङ्घ्रिवाणी-
पायूपस्थस्थितिरपि मनोबुद्ध्यहंकारमूर्तिः ।
तिष्ठत्यन्तर्बहिरपि जगद्भासयन्द्वादशात्मा
मार्तण्डं तं सकलकरणाधारमेकं प्रपद्ये ॥ ३ ॥

स्थूलानां दैहिकरूपतया जडप्रायाणामन्येषां देहप्राणादिविज्ञानानामनवरतानुप्राणको मार्तण्डोऽस्मदादीनामनुभवैकरूपो द्वितीयमपि प्रत्यग्व्याप्त्या सकलानां प्रमातॄणां सकलानि करणानि प्रमोदहेतुरूपाणि च तेषामाधारमनुप्राणकमविभिन्नमाद्यं प्रपद्ये । यस्त्वगाद्यहंकारान्तत्रयोदशेन्द्रियमूर्तिः । अतश्चान्तरहंकारात्मा वेद्यग्राहकरूपः बहिर्बाह्यव्यवसायात्मा श्रोत्रचक्षुःपादिकरणद्वादशात्मा प्रत्यक्षं जगद्भासयंस्तिष्ठतीति स्थूलतरार्थः । रहस्यार्थस्तु—गृहीतसर्वेन्द्रियमूर्तिरपि यः सृष्ट्यादिमरीचिचक्रचित्रसंचारचातुर्याद्द्वादशात्मा एक एव चिदर्कोऽन्तर्बहिश्च जगत्कालानलादि व्योमकलान्तं विश्वं भासयंस्तु सर्वात्मा आत्मनिजमाला चक्रसत्त्वमापाद्यन्नर्चकरणाद्याधारतया निर्बीजोज्ज्वलनत्वदितात्माधिकसातत्यं प्रकर्षेण प्रपद्ये । निजस्फुरत्तां साक्षात्कुर्वन्स्थितोऽस्मीत्यर्थः ॥

---

१. 'प्रनमति' ख.

प्रपञ्चव्याप्याखिलेन्द्रियाधारे स्तुतेऽपि भगवति प्रकाशविमर्शपरमार्थे तद्विमर्शप्रसरसरणिं वाणीं स्तौति—

> या सा मित्रावरुणसदनादुच्चरन्ती त्रिषष्टिं
> वर्णानैत्र प्रकटकरणैः प्राणसङ्गात्प्रसूतान्।
> तां पश्यन्तीं प्रथममुदितां मध्यमां बुद्धिसंस्थां
> वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये॥ ४॥

'अविभागात्तु पश्यन्ती सर्वतः संहृतक्रमा। स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी॥' इत्यादिना लक्षितां प्रथममादावुदितामुन्मिषितां तां स्वरूपज्योतीरूपां पश्यन्त्याख्यां तदनु तामेव बुद्धिसंस्थां बुद्ध्यभ्यासं प्राप्ताम्। 'केवलं बुद्ध्युपादानात्क्रमरूपानुपातिनी। प्राणवृत्तिमतिक्रम्य मध्यमा वाक्प्रवर्तते॥' इत्यादिलक्षिताम्। मध्ये भवत्वान्मध्यमां मध्येऽन्तःकरणे वर्तमानाम्। तदनु वक्त्रे वदने करणेषु जिह्वामूलजिह्वामध्यादिषु विशदां निर्मलाम्। 'स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा। वैखरी वाक्प्रयोक्तॄणां प्राणवृत्तिनिबन्धना॥' इत्यादिना लक्षिताम्। विखरे शरीरे भवत्वात्तदाख्यां वाचं प्रपन्नोऽस्मि। कां तामित्याह—या सा मित्रावरुणसदनादग्नीषोममयात्मनः परावाक्प्रधानान्मध्यधाम्नोऽकारादींस्त्रिषष्टिं वर्णानुच्चरन्ती आसूत्रितक्रमतया भेदाभेदाभ्यां भेदेन च विमृशन्ती। केनोच्चरन्ती। प्रकटैरन्तर्मुखीभावेनाभिन्नस्फुटप्रकाशैकमध्यमाप्तैः करणैः सर्वेन्द्रियैः। कीदृशान्वर्णान्। प्राणसङ्गात्प्रसूतानुद्भूतान्। तत्र चिज्ज्योतिषि गुणीभूतसूक्ष्मप्राणसङ्गात्पश्यन्त्यां गुणीभूतचित्सूक्ष्मप्राणसङ्गान्मध्यमायां स्थूलप्राणसङ्गाद्वैखर्यां वर्णा जायन्ते। ते च त्रिषष्टिः। तद्यथा—अ-इ-उ-ऋ-वर्णाश्चत्वारो ह्रस्वदीर्घप्लुतभेदा द्वादश। ऌकारस्य दीर्घो नास्तीति ह्रस्वप्लुतभेदाद्द्विविधः। संध्यक्षराणां ह्रस्वा न सन्तीति दीर्घप्लुतभेदादष्टविधाः। एवं स्वरा द्वाविंशतिः। कादयो मान्ताः पञ्चविंशतिः स्पर्शाः। अन्तस्थाश्चत्वारः। ऊष्माणश्चत्वारः। कुं खुं गुं घुं इति यमाश्चत्वारः। अनुस्वारविसर्गजिह्वामूलीयोपध्मानीया अं अः ᳵक ᳵप इति चत्वारः। यथोक्तम्—'स्वरा द्वाविंशतिश्चैव स्पर्शानां पञ्चविंशतिः। यादयः शादयश्चाष्टौ चत्वारश्च यमाः स्मृताः॥ अनुस्वारो विसर्गश्च ᳵक ᳵप इति पराश्रयौ। त एते गदिता वर्णास्त्रिषष्टिरिह सूरिभिः॥' इति। मित्रः सूर्योऽन्तरशेषद्वैतश्लोषकारित्वादग्निः। वरुणो ह्लादाप्यायकारित्वात्सोमः। 'वर्णानन्तः प्रकटकरणैः प्राणसङ्गात्प्रसूते' इति पाठान्तरे या परा वाक्शक्तिर्मित्रावरुणसदनादुच्चरन्ती प्रमाणमेयात्मकसूर्यचन्द्राश्रयेणात्माकाशादूर्ध्वं सरन्ती सर्वोत्तीर्णं निजं धाम प्रमातृरूपं श्रवन्ती अस्ति सैवान्तःप्रकटैरन्तरेव स्फुटैरिन्द्रियैः कृत्वा त्रिषष्टिं वर्णान्प्राणसङ्गाद्धेतोः प्रसूते जनयतीत्यन्वयः। इन्द्रियाणां रूपाद्युपलब्ध्यानुमेयत्वा-

---

१. अयं श्लोको महाभारतटीकायां योगवासिष्टटीकायां श्रीमद्भागवतटीकायां च तत्तट्टीकाकर्तृभिः प्रमाणतया समुद्धृतोऽस्ति. २. 'अन्तः' ख. ३. 'सङ्गप्रसूतान्' ख.

वृद्धिःस्फुटत्वाभावेनान्तःप्रच्छन्नभावः । एतदभिधेयपक्षे उच्चारणप्रभुत्वोः क्रमेणानुप्राव-णिविनाशः ॥

एवं वाक्प्रसरात्मानं भगवन्तं स्तुत्वा मध्यमधामतापकत्वमर्थयते—

ऊर्ध्वाधःस्थान्यतनुभुवनान्यन्तरा संनिविष्टा
नानानाडिप्रसवगहना सर्वभूतान्तरस्था ।
प्राणापानप्रसननिरतैः प्राप्यते ब्रह्मनाडी
सा नः श्वेता भवतु परमादित्यमूर्तिः प्रसन्ना ॥ ५ ॥

परमादित्यस्य चिद्भानोर्ब्रह्मनाडीरूपा या सेति दिव्या मूर्तिः पशुचित्प्रत्याहृतिर्नो-ऽस्माकं प्रसन्ना प्रकाशा प्रशमितप्राणापानकालुष्या अत एव श्वेता चिदानन्दघनतया स्फुरन्ती अस्तु । कीदृशी सा । या ऊर्ध्वमधश्च स्थितानि अनन्तानन्तानि अध्यधिकादि-कालाग्न्यन्तभुवनेशानानाभुवनानि देहे पाहिमान्तरा मध्ये संनिविष्टा व्याप्यावस्थिता । तथा नानानाडीनां चक्षुरादिरोमरन्ध्रान्तानां शुषिराणां प्रसवेन प्रकारेण गहना दुर्दु-ष्प्रापा । सर्वेषां स्थावरादिदेवयोनिभेदान्तानां भूतानामन्तरस्था देहमध्ये वर्तमाना । यतश्चोक्तयुक्त्या गहना अत एव वैचित्र्यदेव प्राणापानयोः सर्वबाह्यप्रसवप्रवेशयोः प्रसननिर-तैर्योगपरायणैः प्राप्यते समाविश्यते ॥

किं च—

न ब्रह्माण्डव्यवहितपथा नातिशीतोष्णरूपा
नो वा नक्तंदिवगमनितातापनीयापराहुः ।
वैकुण्ठीया तनुरिव रवे राजते मण्डलस्था
सा नः श्वेता भवतु परमादित्यमूर्तिः प्रसन्ना ॥ ६ ॥

ब्रह्माण्डं ब्रह्मविलावरणनिविष्टस्याण्डं गर्भीकृतभूमण्डलामान्त्यप्रकाशकमण्डं तेन न व्यवहिता अपि तु समन्ततः कोटिकारी पन्थाः प्रसरमार्गो यस्याः तथा अतिशीतः सोमः अत्युष्णो वह्निः इयं तु द्वैतदाहाद्वैतानन्दस्यन्दित्वाच्च नैवंरूपा अपि तु समर-सीभूताग्नीषोमात्मा । तथा नक्तंदिवं रात्रिंदिनं यो गमो भ्रमणं तेन नो इता अस्तमयभावं न प्राप्ता उद्गता । तथा अतापनीया परमाह्लादप्रदा । तथा अपगतो राहुराच्छादनप्र-धानः शून्यप्रमाता यस्याः सा । किं च रवेश्चिद्भानोर्मण्डले रश्मिपरिवेषे राजते दी-प्यते । बाह्यार्कमूर्तिस्तु ब्रह्माण्डव्यवहिता सर्वोकालमात्रावभासिका शिशिरग्रीष्मा-द्यतिशीतोष्णरूपा अहर्निशं भ्रमन्ती संतापिका राहुनिभूता चेति व्यतिरेकव्याप्तिः । वैकुण्ठस्य विष्णोर्मूर्तिरिवेत्युपमा । सापि च वहिर्वनावतारे ब्रह्माण्डे ब्रह्माण्डान्तर्निरुद्ध-मार्गा न केनचित् । अत एव नातिशीतोष्णरूपा । प्रकाशाह्लादा भगवतोऽभिन्नरूपा ।

१. 'ऊर्ध्वाधःस्थादतनु' ख. २. 'अन्तरे' ख.

नक्तंदिवगमेनाहोरात्रपरिभ्रमणेन न मिता। देवादिभिर्निर्णयत्तया परिच्छिन्नेत्यर्थः। तापनीया महाप्रतापवती। अपगतराहुरपक्रान्तरविमण्डला चेति श्लेषः। एवमयमत्रोपमाश्लेषो व्यतिरेकध्वनिना संसृष्टः॥

अथ युगपदन्तर्बहिश्चार्कमूर्तिं स्तौति—

यत्रारूढं त्रिगुणवपुषि ब्रह्म तद्बिन्दुरूपं
योगीन्द्राणां यदपि परमं भाति निर्वाणमार्गः।
त्रय्याधारः प्रणव इति यन्मण्डलं चण्डरश्मे-
रन्तःसूक्ष्मं बहिरपि बृहन्मुक्तयेऽहं प्रपन्नः॥ ७॥

तच्चण्डरश्मेश्चिद्दीप्तांशोर्मण्डलं मुक्तये समावेशात्मजीवन्मुक्त्यर्थं प्रपन्नोऽस्मि। कीदृशम्। अन्तश्चिद्भुवि सूक्ष्ममायोन्मेषात्म। योगीन्द्रैरेव लभ्यम्। बहिरपि बृहन्महापरिमाणम्। यत्र सृष्टिस्थितिसंहारकारिरजःसत्त्वतमोनिविष्टब्रह्मविष्णुरुद्राभिधाग्यकारोकारमकाराख्यह्रस्वदीर्घप्लुतवर्णत्रयात्मत्रिगुणवपुषि प्रणवे विश्ववेद्याविभागवेदनात्मा बिन्दुरिति तदुपलक्षितोन्मनान्ताप्रमेयपरिपाटीरूपं यस्य तादृग्ब्रह्म बृहद्बृंहकं च शाक्तं तेज आरूढयत्युत्कृष्टतया व्यवस्थितम्। यच्च परममसामान्यम्। योगीन्द्राणां मितयोग्यतिशायिपरतत्त्वैकभाजां निर्वाणमार्गो जीवन्मुक्त्युपायो भाति स्वप्रकाशतया स्फुरति। त्रय्याः प्राङ्निर्णीताया आधार आश्रयः। प्रकर्षेण नूयते उत्कृष्टतया विमृश्यते परं पारमेश्वरं स्वरूपं येनेति कृत्वा प्रणव इत्येतन्नाम यत्। बाह्येऽप्यर्कमण्डले 'नवयोजनसाहस्रो विग्रहोऽर्कस्य मण्डलम्। त्रिगुणं' इति स्वच्छन्दादिदृष्टनीत्या यत्र बिन्दुरूपमिति सितवर्तुलाकारं ब्रह्ममयं तदसामान्यं बिम्बमारूढम्। तच्च योगिनां निर्वाणमार्गः। तेषां हि सूर्यमण्डलभेदनस्य श्रवणात्। तथा वक्ष्यमाणदृशा सामर्ग्यजुर्मयधाममण्डलाकृतित्वात्त्रय्याधारः। प्रकर्षेण नूयमानत्वात्प्रणवो विश्वशरीरत्वाच्च प्रणवः॥

यस्मिन्सोमः सुरपितृनरैरन्वहं पीयमानः
क्षीणः क्षीणः प्रविशति यतो वर्धते चापि भूयः।
यस्मिन्वेदा मधुनि सरघाकारवद्भान्ति चाग्रे
तच्चण्डांशोरमितममृतं मण्डलस्थं प्रपद्ये॥ ८॥

चिद्भानोर्मण्डलस्थं मध्यधामनिविष्टं तत्परमानन्दरूपममितमनल्पममृतं प्रपद्ये समाश्रये। यत्रामृते सोमः सर्वो मेयवर्गः सुरादिभिः सर्वैः प्रमातृभिः प्रतिदिनं कलाग्रासयुक्त्या पीयमानत्वात्क्षीणः क्षीणः सन्पुनः पुनः प्रविशति हृद्विश्रान्त्यनन्तरं निमज्जति। यत एव मण्डालाद्भूयोऽपि वर्धतेऽभिव्यज्यते मेयरूपश्चन्द्रः। यस्मिंश्च वेदाः सर्वशास्त्राणि मधुनि माक्षिके सरघाणां मधुकरीणामाकार इवाग्रे भान्ति पुरः स्फुरन्ति। यथा सरघा

१. 'तत्प्रपद्य' ख.

नाडिकं संविल परिहृत्य गोळमलायते तथा सर्वे वेदा वाक्यैकवाक्यतया परब्रह्मन-नुतमात्मस्य भ्राजन्ते । यथोऽपि सोमः कृष्णपक्षेषु पितृदेवनरप्रकाशकमात्मनः कलो-ऽनावस्थायां सूर्यमण्डलं प्रविश्य वर्तते । वेदार्थाकज्योतिर्भाव आगते ॥

ऐन्द्रीमाशां पृथुकवपुषा पूरयित्वा क्रमेण

क्रान्ताः सप्त प्रकटहरिणा येन पादेन लोकाः ।

कृत्वा ध्वान्तं विगलितबलिव्यक्ति पाताललीनं

विश्वालोकः स जयति रविः सत्यमेवोर्ध्वरश्मिः ॥ ९ ॥

'यो हि यस्माद्गुणोत्कृष्टः स तस्मादूर्ध्वमिष्यते' इति स्थित्या ऊर्ध्वा विशेषोत्कृष्टा रश्मयो यस्य । अत एव सतां विद्यमानानामशेषाणां भावः सत्त्वं महाप्रकाशात्मकत्वम् । तदेव सत्यस्वरूपः । ततश्च प्रकाशमानतया प्रकाशात्मन्येव विश्वस्य समन्तात्प्रकाशो विश्वालोकः स एव रविर्जिह्वानुर्जयति सर्वोत्कर्षेण वर्तते । येनैन्द्रीमाशां प्रत्योन्मेषदशां पृथुकवपुषा योगिनामसूक्ष्मशाश्वतानन्दात्मना पूरयित्वा उन्मिषितप्राणादिभेदोपनिषदा-साम्योन्मुद्रितां कृत्वा 'विश्वादिसप्तात्मानाः शक्तिमन्तः प्रकीर्तिताः' इति श्रीपूर्वा-दिशनीत्या शिवमन्त्रमहेश्वरमन्त्रेश्वरमन्त्रविज्ञानाकलप्रलयाकलसकलरूपाः क्रमात्कर्म-प्राणोन्मुद्रितया निजशक्तिसहिताः सप्तलोकाः 'पादोऽस्य विश्वा भूतानि' इति स्थि-त्या पादेन निर्भासनात्रेणाक्रान्ताः कोडीकृत्य स्वज्योतिर्मयीकृताः । कीदृशेन । प्रक-टाः स्वात्मभावा रूपादिविश्वाहरणाद्धरयश्चतुरादिकिरणरूपा यस्य । तदुक्तं श्रुतौ—'युक्ता ह्यस्य हरयः शता दश' इति । निःसंकल्पशक्तिरात्मेति यस्यार्थः । कथं क्रान्ताः । ध्वा-न्तमात्मन्यनात्मप्रतीत्यात्मकाज्ञानं विगलिता बलिरनात्मन्यात्माभिमानिनी व्यक्तिर्यस्य तादृक् पाताललीनं निःशेषप्रशमितं कृत्वा । वामनाख्येन सह्याद्यादिनैन्द्री दिशं सूक्ष्मवपुषापूर्य भूरादिलोकाः पादेन मरीचिनिर्भासिता क्रमेण क्रान्ताः । प्रकटहरिणा च नारायणेन विगलिता बलवानस्य दानवेन्द्रस्य व्यक्तिर्यत्र तद्ध्वान्तं दानवकुलं पाताललीनं कृत्वा भूरादिलोकावरणविन्यासक्रमेणाक्रान्ताः । किं कृत्वा । पृथुकवपुषा वामनशरीरेण इन्द्रादिदिगापूरणं कृत्वा । सोऽपि विश्वालोकः सत्यप्र-धानमेवात्र श्लेषालंकारः । श्लेषोपमाव्यतिरेकस्यापि विषयम् ॥

ध्यात्वा ब्रह्म प्रथममतनु प्राणमूले नदन्तं

दृष्ट्वा चान्तः प्रणवमुखरं व्याहृतीः सम्यगुक्त्वा ।

यत्तद्वेदे तदिति सवितुर्ब्रह्मणोक्तं वरेण्यं

तद्भर्गाख्यं किमपि परमं धामगर्भं प्रपद्ये ॥ १० ॥

ब्रह्मणा प्रजापतिना वेदेषु प्रणवमुखरमोंकारोच्चारणपूर्वं तदित्यादि गायत्र्याः सवितु-

1. 'मूलेन दत्तं' ख.

विश्वप्रसूतिहेतोश्चिदादित्यस्य यत्तत्किमपीत्यसामान्यं भर्ग इत्याख्या यस्य तत्परमं सर्वोत्कृष्टं धाम परस्फुरत्तात्म शाक्तं तेजो बाह्यसूर्यसोमवह्न्यादिधामक्रोडीकारित्वाद्धामगर्भं वरेण्यमनुग्रहकारि उक्तं तत्प्रपद्ये समाविशामि । किं कृत्वा ब्रह्मणोक्तम्, किं कृत्वा च प्रपद्ये । प्रथममादावतनु अशरीरं श्रीभर्गशिखादिष्टनीत्या अकारपरामर्शात्म वीरेश्वराख्यं च ब्रह्म बृहद्बृंहकं च परं शाक्तं धाम प्राणमूले अप्राणायस्फुरत्ताधाम्नि ध्यात्वा विचिन्त्यानन्तरं नदन्तमिति नादाख्यं परविमर्शात्मानमन्तरित्युक्तशाक्तरूपप्राणितकल्पतया स्थितं दृष्ट्वा स्वात्मतया साक्षात्कृत्य तन्नादविमर्शानुप्रवेशावष्टम्भबलोन्मिषत्प्रणवोच्चारणपूर्वम् । तथा 'भूः स्वाहा' 'भुवः स्वाहाः' 'स्वः स्वाहा' 'भूर्भुवःस्वःस्वाहा' इति च मन्त्ररूपा समग्रमेयमानप्रमातॄणां ससंस्काराणां परब्रह्ममयत्वामर्शिनीर्व्याहृतीश्चतस्रः सम्यगित्यन्तरामर्शावष्टम्भाशैथिल्येनोक्त्वा उच्चार्य । अथ च 'सर्वव्यवहारानेकरूपाः कथा जपः' इति शिवसूत्रादिष्टनीत्या तदभेदामर्शप्रधानतया परशाक्तरसाप्लावितान्संपाद्य । शाक्तधामैकाम्यवशासादितशांभवधामावष्टम्भबलेन व्युत्थानदशामपि तदभेदरसप्रोक्षितां विधायेत्यर्थः । धामगर्भमित्यत्र धामशब्दस्तन्त्रेण द्विरुक्तः । तथा प्रणवमुखरमिति ॥

त्वां स्तोष्यामि स्तुतिभिरिति मे यस्तु भेदग्रहोऽयं
सैवाविद्या तदपि सुतरां तद्विनाशाय[1] युक्तः ।
स्तौम्येवाहं त्रिविधमुदितं स्थूलसूक्ष्मं परं वा
विद्योपायः[2] पर इति बुधैर्गीयते खल्वविद्या ॥ ११ ॥

हे भगवन्, त्वां स्तुतिभिः स्तोष्यामीति स्तोतृस्तुत्यस्तुतिकल्पनात्मा यो मे भेदग्रह एषैव चिदद्वयाप्रथनात्माविद्या तथापि तस्या अविद्यायाः सुतरामतिशयेन विनाशाय निःशेषोन्मूलनाय युक्तो नित्यसंबद्धस्त्वां स्तौम्येव देहाप्रमातृतानिमज्जनेन सर्वोत्कृष्टतया सततं परामृशामि न तु क्षणमप्युदासीन आसे । त्वामेव चिदर्कं स्तौमि न तु परिमितां कांचन देवताम् । कीदृशं त्वाम् । स्थूलं बाह्यप्राणार्करूपम् । सूक्ष्मं मध्यनाडीगतं प्राणब्रह्मरूपम् । परं चानवच्छिन्नं विश्वात्मचिदानन्दघनम् । तदिति प्राक्तनवाक्यव्यावर्णितमेकमेव । नित्योदितं च । वाशब्दश्चार्थे । युक्तं चैतत् । यतो बुधैस्तत्त्वज्ञैरविद्यैव विद्योपायः पर इत्युक्तः । स्तोतृस्तुत्यादिविभागकल्पनात्माविद्यया समस्ताविद्याबीजदेहादिप्रमातृत्वाभिमानप्रशमनेन चिदानन्दघनपरमात्मोत्कर्षपरामर्शात्मा स्तुतिः परमसमावेशप्रदेत्यर्थः ॥

स्तौम्येवेत्युक्तिं प्रपञ्चयति—

योऽनाद्यन्तोऽप्यतनुरगुणोऽणोरणीयान्महीयान्
विश्वाकारः सगुण इति वा कल्पनाकल्पिताङ्गः ।

---

१. 'तद्व्युदासाय' ख. २. 'वेद्योपायः' ख.

नानाभूतप्रकृतिविकृतीर्दर्शयन्भाति यो वा
तस्मै तस्मै भवतु परमादित्य नित्यं नमस्ते ॥ १२ ॥

हे परमादित्य चिदर्क, तस्मै तस्मै इति पदमुक्तनानारूपाय विश्वात्मने तुभ्यं नित्यं नमः । सर्वथात्वं देहादिप्रह्वतया पदानुषक्तत्वमेव गमयितुमित्यर्थः । वीप्सायां तस्मै । योऽनाद्यन्तो देशकालाद्यनवच्छिन्नः । अतनुरनाकारोऽनभिव्यक्तः । अतश्च शार्ङ्गादिगुणास्पृष्टः । अणोरणुतमसूक्ष्मरूपतया योगिदृश्यात्परमाणोरप्यणीयानतिसूक्ष्मः न कस्यापि मेयः । अपि तु स्वप्रकाशचिदेकरूपः । न तु देशतः संकुचितः । परमाणोः सूक्ष्मस्य मेयत्वाद्दृश्यत्वाच्च । महीयान्व्यापकः । अतश्च विश्वकोटीकवलित्वाद्विश्वाकारः । शार्ङ्गादिगुणयोगानात्मगुणः । इत्येवंप्रकारया कल्पनया कल्पितानि पृथक्पृथग्विविधानि नामानि तत्तद्भेदतया अवगमनानि यस्य तादृगेवानन्तोक्तप्रकारावच्छिन्नवस्तुविषयशब्दविकल्पास्पृष्टं परमेकं स्वरूपमनवच्छिन्नमिति ज्ञापयति । नानाभूतानि विचित्राः स्थावरादिप्रमात्रन्ताः प्राणिनस्तेषां प्रकृतीर्मायाप्रकृतिशुद्धमोचितादिकारणानि, विकृतीः कलाबुद्धिदेहादिकान्दर्शयन्य आभाति । संकुचितसर्वाकारोल्लासकतया या यः स्फुरतीत्यर्थः ॥

तत्त्वाख्याने त्वयि मुनिजना नेति नेति ब्रुवन्तः
श्रान्ताः सम्यक्त्वमिति न च तैरीदृशो वेति चोक्तः ।
तस्मात्तुभ्यं नम इति वचोमात्रमेवास्मि वच्मि
प्रायो यस्मात्प्रसरतितरां भारती ज्ञानगर्भा ॥ १३ ॥

यस्मात्त्वत्तो भारती पश्यन्त्यादिवाक् ज्ञानगर्भा स्वाभासमसंवित्प्रधाना प्रसरति तस्मै तुभ्यं नम इति वचोमात्रमेव, न त्वतिरिक्तं स्तुतिवाक्यादि वच्मि । ज्ञानस्य सर्वेषामुपगमहेतोः अनवच्छिन्नस्य विविधस्तुतिवाग्भिः स्तोतुमशक्यत्वात् । नमःशब्देन तु देहादिप्रह्वतां तुरीयस्वरूपचित्प्रकर्षपरामर्शनस्य कर्तुं शक्यत्वात् । युक्तं चैतत् । यस्मान्मुनयोऽपि त्वयि त्वद्विषये तत्त्वाख्याने अणुर्न महान्न ह्रस्वो दीर्घो नेत्यादि ब्रुवन्तः श्रान्ताः खिन्नाः । न च तैस्त्वमित्थंविशेषोऽसीति एतादृशो वेति एवमुक्तो वेति सम्यगुक्तः । वाङ्मनोऽगोचरत्वादित्यर्थः ॥

सर्वाङ्गीणः सकलवपुषामन्तरे योऽन्तरात्मा
तिष्ठन्काष्ठे दहन इव नो दृश्यसे युक्तिशून्यैः ।
यैश्च प्राणारणिषु नियतैर्मथ्यमानासु सद्भि-
र्दृश्यं ज्योतिर्भवसि परमादित्य तस्मै नमस्ते ॥ १४ ॥

---

१. 'विकृतिः' ख. २. 'तुभ्यं' ख. ३. 'अभिधाम्नि' ख. ४. 'यच्च' ख. ५. 'तुभ्यं' ख.

हे परमादित्य चिदर्क, तस्मै निर्विशेषाय ते तुभ्यं नमः । यस्त्वं स्थावरादिदेवयोन्यन्तानां रुद्रक्षेत्रज्ञानां च सर्वेषां सर्वाङ्गेषु भवो व्यापकः सकलवपुषामन्तरे मितग्राहकात्मनि स्वरूपे योऽन्तरात्मा परमानन्दत्वात् 'आत्मा चैवान्तरात्मा च' इति श्रीस्वच्छन्दादिदिष्टपुर्यष्टकप्रमाता तिष्ठन्नवस्थासुरपि युक्त्या योगेन शून्यैरपि न दृश्यसे । यथा काष्ठेऽग्निस्तिष्ठन्नपि युक्तिशून्यैररणिमथनानभिज्ञैर्न दृश्यते तत्काष्ठकवलीकारिज्वलद्रूपतया नोपलभ्यते । यश्च त्वं प्राणारणिषु सर्ववाहमार्गोदयविश्रान्तिपदेषु सद्भिर्योगिभिर्नियतैरभियुक्तैर्मथ्यमानासु 'ऊर्ध्वशक्तिनिपाताच्च अधःशक्तिनिकुञ्चनात् । रुद्रशक्तिसमावेशं यो जानाति स पण्डितः ॥' इत्याम्नायादिदिष्टयुक्त्यानवरतान्दोलनतः प्रशमितमरुद्घापिकासु दृश्यं ज्योतिर्भवसि स्वप्रकाशचिद्रूपः स्फुरसि । अत्र पर्यायेण प्राणापानावूर्ध्वाधरारणिरूपौ । योगिप्रयत्नो मथनकाष्ठम् ॥

स्तोता स्तुत्यः स्तुतिरिति भवान्कर्तृकर्मक्रियात्मा
　क्रीडत्येकस्तव नुतिविधावस्वतन्त्रस्ततोऽहम् ।
यद्वा वच्मि प्रणयसुभगं गोपते तच्च तथ्यं
　त्वत्तो ह्यन्यत्किमिव जगतां विद्यते तन्मृषा स्यात् ॥ १५ ॥

हे गोपते चिन्मरीचिचक्रेश्वर, भवानेकोऽद्वितीयः स्तोत्रादिरूपतया क्रीडति स्वस्वातन्त्र्यात्तत्तद्रूपतया स्फुरति । यदुक्तं मयैव भैरवानुकरणस्तोत्रे—'स्तोता स्तुत्यः स्तुतिरिति यदपि विभिन्नं न किंचिदस्तीह । मृशसि यथा यद्रूपं चिद्रूपतया भवस्येतत् ॥' इति । यतोऽहमिति भवत्कल्पितमेव । ततोऽहमिति संकोचप्रधानो मायाप्रमाता त्वत्स्तोत्रकरणेऽस्वतन्त्रस्त्वामेव चिदात्मानं स्तौमि । न त्वहं नामान्यः कश्चिदित्यर्थः । यच्च किंचित्त्वदात्मैवाहं प्रणयसुभगं प्रार्थनासुन्दरं वच्मि तत्सर्वं तथ्यं त्वत्परमार्थमेव । यतस्त्वत्तश्चिदात्मनो व्यतिरिक्तं जगतां किमिव विद्यते । न किंचिदस्ति । यदि वा तथापि किंचित्संकल्प्यते तन्मृषा स्यात् । नैव भवेत् । चिदात्मतां विना कस्यचिदपि चेतनाचेतितस्य संकल्पविकल्पविषयत्वस्याप्ययोगेन गगनकुसुमतोऽपि निकृष्टत्वात् । इत्थं युक्तितस्त्वदभेदसारैव स्तुतिः ॥

प्रातीतिकक्रमेण तु यद्यपि भेदस्तथापीत्थं त्वमाराध्योऽस्माकमित्याह—

ज्ञानं नान्तःकरणरहितं विद्यतेऽस्मद्विधानां
　त्वं चात्यन्तं सकलकरणागोचरत्वादचिन्त्यः ।
ध्यानातीतस्त्वमिति न विना भक्तियोगेन लभ्य-
　स्तस्माद्भक्तिं शरणममृतप्राप्तयेऽहं प्रपन्नः ॥ १६ ॥

ऐन्द्रियकज्ञानवतां मायाप्रमातृणामस्माकमिन्द्रियागोचरो भवानचिन्त्यत्वाद्ध्यानविषयो न भवतीति देहादिमितप्रमातृतामज्जनोन्मज्जनचिदर्कभजनात्मकभक्तियोगसंपाद-

नीलत्वाद्गगनस्तो भक्तिरेव शाक्तस्फारविश्रमदानुप्रासवेद्यमानाश्रितः । उक्तं च विज्ञानभैरवे—'भक्त्युद्रेकाद्विरक्तस्य यादृशी जायते दशा । सा शक्तिः शांकरी नित्यं भावयेत्तां ततः शिवः ॥' इति ॥

हार्दं हन्ति प्रथममुदिता या तमः संश्रितानां
सत्त्वोद्रेकात्तदनु च रजः कर्मयोगक्रमेण ।
साम्यस्था च प्रथयतितरां सत्त्वमेव प्रपन्ना
निर्वाणाय व्रजति शमिनां तेऽर्क भक्तिस्त्वयीव ॥ १७ ॥

हे अर्क, तव भक्तिः प्रपन्ना समाश्रिता सती शमिनां शान्तरागादिकलङ्कानां निर्वाणाय मोक्षाय व्रजति जीवन्मुक्तत्वाभिव्यक्तये घटते । त्वयि यथा । त्वयि हि सम्यक्त्वं पर्यवसानपुरोगमना प्रत्यन्तविज्ञानपर्यन्तहेतुः । तथा चैषा प्रथममुदिता समुन्मिषितमात्रा हार्दं प्रकाशानन्दात्महृद्गतं तमस्तत्त्वभेदाख्यातिरूपमाणवं मलं संश्रितानां भक्तिभाजां हन्ति नाशयति । तदनु सत्त्वस्य प्रकाशस्योद्रेकात्प्रकर्षात्कर्मयोगक्रमेण स्वात्मदेवताविश्रान्तिफलशारीरकर्मानुष्ठानेन कार्ममलरूपं रजो हन्ति । तथा साम्यस्था परिशीलनेन स्वीकृता सती भावः सत्त्वं प्रकाशैकघनत्वमेव प्रकाशमाने सर्वत्र प्रथयतितराम् । न तु पशुजन्मातीयसकलात्मनिमज्जनप्रयाहत् । अन्यत्रापि प्रत्यन्तविदां तच्छिवानां सत्त्वं प्रथयति ॥

तामासाद्य श्रियमिव गृहे कामधेनुं प्रवासे
ध्वान्ते भातिं धृतिमिव वने योजने ब्रह्मनाडिम् ।
नावं चाब्धिन्विषमविषयग्राहसंसारसिन्धौ
गच्छेयं ते परमममृतं यत्र शीतं न चोष्णम् ॥ १८ ॥

तां भक्तिमाश्रित्य चिदर्कस्य ते संबन्धि परममृतं परं शान्तं धाम गच्छेयं समाविशेयम् । यत्र शीतं ग्रीष्मवाताद्यर्कपातवैक्लव्यात्मकत्वादुष्णं च न भवति । अपि तु सोमसूर्यप्रकाशाह्लादरूपमग्नीषोमात्म । कीदृशीं ताम् । गृहे स्थाने श्रियमिव । संपूर्णभोगप्रदत्वात् । प्रवासे दिग्भ्रमयुक्ते कामधेनुमिव चिन्तितसर्वार्थप्रदत्वात् । ध्वान्ते मायातमसि भातिमिव । पूर्णप्रथाहेतुत्वात् । वने गहनपर्वतादौ धृतिमिव विश्रान्तिहेतुत्वात् । योजने परशिवात्मैक्यविषये ब्रह्मनाडिं सुषुम्नाम् । परमोपायत्वात् । विषमविषया एव ग्राहा भीषणा जलचरा यत्र तादृशे संसारसमुद्रे नावमिव । उत्तारकत्वात् ॥

अग्नीषोमावखिलजगतः कारणं तौ मयूखैः
सर्गादाने सृजसि भगवन्धामवृद्धिक्रमेण ।

१. 'सत्त्वोद्रिक्ता' ख. २. 'सा साम्यस्था' ख.

तावेवान्तर्विषुवति समौ जुह्वतामात्मवह्नौ
द्वावप्यस्तं नयसि युगपन्मुक्तये भक्तिभाजाम् ॥ १९ ॥

हे भगवन्, अखिलस्य बाह्यस्य नीलसुखादेर्ग्राह्यरूपस्यान्तरस्य च ग्राहकरूपस्य देहादेर्जगतो यावग्नीषोमौ सर्ववाहवाही प्राणोऽपानश्च प्रकाशनावस्थानहेतुत्वात्कारणम् । तौ प्रसिसृक्षाप्रविविक्षात्मसर्गादानसमये वस्त्वाभासनविमर्शात्मसृष्ट्यादौ तन्निमित्तं च ह्रासवृद्धिक्रमेण द्वादशषोडशकलाकलनपर्यायतो मयूखैः सृष्ट्यादि देव्यात्मनिजमरीचिभिः सृजसि मुहुर्मुहुर्निर्मिमीषे । तावेव च भक्तिभाजामन्तर्विषुवति सम्यङ्नयनात्मसमानमरुत्प्रधाने कुम्भके समौ सोमसूर्यकलान्योन्यसंघर्षमिश्रितौ सन्तावात्मवह्नावुदानवह्नौ जुह्वतां मुक्तये शिवात्मभेदप्रथारूपाणवादिमलत्रयप्लुष्टोपलक्षितशिवाद्वैतप्राप्तये द्वावपि युगपत्क्रमं मयूखैरेवास्तं नयसि विश्वात्मक व्यानव्याप्तिमाविश्य ज्ञानक्रियात्मपग्नीषोमरूपस्वात्ममयौ संपादयसि ॥

स्थूलत्वं ते प्रकृतिगहनं नैव लक्ष्यं ह्यनन्तं
सूक्ष्मत्वं वा तदपि सदसद्व्यक्त्यभावादचिन्त्यम् ।
ध्यायामीत्थं कथमविदितं त्वामनाद्यन्तमन्त-
स्तस्मादर्क प्रणयिनि मयि स्वात्मनैव प्रसीद ॥ २० ॥

हे अर्क, ते तव स्थूलत्वं विश्वव्यापकत्वं प्रकृत्या गहनत्वान्नैव लक्षयितुं शक्यम् । यस्मादनन्तं दिक्कालाकारैरनवच्छिन्नम् । सूक्ष्मत्वमपि वा 'अणोरणीयान्' इत्येतद्व्याख्यानावसरव्याकृतयुक्त्या परप्रमात्रात्म यत्तदपि सदसद्व्यक्त्यभावाद्भावाभावरूपत्वेनाप्रतीतेरचिन्त्यम् । तदित्थमनाद्यन्तत्वादविदितं त्वां कथमन्तः स्वान्ते चिन्तयामि न कथंचित् । तस्मान्मयि प्रणयिनि त्वत्प्रार्थनावहिते स्वयमेव प्रसीद प्रशमितदेहादिप्रमातृताभिमानकालुष्यः प्रस्फुर ॥

यत्तद्वेद्यं किमपि परमं शब्दतत्त्वं त्वमन्त-
स्तत्सद्व्यक्तिं जिगमिषु शनैर्लीति मात्राकलः खे ।
अव्यक्तेन प्रणववपुषा बिन्दुनादोदितं स-
च्छब्दब्रह्मोच्चरति करणव्यञ्जितं वाचकं ते ॥ २१ ॥

यत्किमप्यसामान्यं त्वं तदन्तरित्यन्तर्मुखानवच्छिन्नप्रकाशात्मनि पदे । शब्दतत्त्वमिति 'शास्त्रं शब्दात्मकं सर्वं शब्दो हंसः प्रकीर्तितः' इति श्रीस्वच्छन्दादिष्टानाहतभट्टारकरूपम् । परममिति परमोत्कृष्टम् । यदुक्तं श्रीकालोत्तरे—'नादाख्यं यत्परं बीजम्' इति । वेद्यमिति सुप्रकटसुस्फुरत्तात्मकत्वादनपह्नवनीयम् । न तु विदिक्रियाकर्मात्मकम् ।

१. 'समं' ख. २. 'मुक्तिभाजाम्' ख. ३. व्यक्तिभावात्' ख. ४. 'मात्रां' ख. ५. 'यत्' ख.

यदुक्तं श्रीस्वच्छन्दे—'यस्य रूपं शरीरं वा नास्ति वर्णः क्रिया तथा । स कथं गृह्यते सूक्ष्मो ह्यप्रमेयो निरञ्जनोऽव्ययः ॥' इति । श्रीनर्मशिखायामपि—'नैव वर्णो न वा शब्दो न चैवायं कलात्मकः । केवलः परमानन्दो नीरो नित्योदितो रविः ॥ नास्तमेति न चोदेति न शान्तो न विकारवान् । सर्वभूतान्तरचरो भानुर्भर्ग इति स्मृतः ॥' इति । तदेतत्परमात्मस्वरूपमिदं रूपम् । सर्वादि त्रिमार्गितिष्ठति । 'ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति स्थित्या शब्दब्रह्मरूपतां त्रिपृष्ठ्य ये मुमुक्षवः अ-कारोकारमकारादिमात्राभ्यः कला विमर्शार्थाः शनैः शनैः क्रमेण यान्ति मुक्तिम् । इत्थं शक्तिस्थितिदर्शनभासितशब्दब्रह्मभित्तौ प्रणववपुषा ॐकारात्मना अन्वयेन पश्य-न्ती वाक्प्रधानेन भाति । न तु व्यपदेशेन मध्यमादिवाग्भूमिकास्पृशा । 'प्रणवः सर्ववेदेषु' इति स्थित्या क्रोडीकृताशेषवाच्यवाचकप्रसारं शब्दब्रह्मोपक्रमे स्वयं प्रवर्तते । न तु बा-ह्यं ते । कीदृक् । बिन्दुनादाभ्यां समस्तवेद्यवेदितृवेदनसमस्तवाच्यवाचकाभेदपरामर्शस्वभावाभ्या-मुदितम् । सर्वोत्कृष्टगगनान्तं सकलं समनुसरति । अत्रागमिकीं युक्तिं स्मारयति—कर-णेन दिव्यकरणबन्धेन न तु जिह्वामूलमध्यादिना व्यञ्जितं प्रकटीकृतम् । यदुक्तं श्रीस्वच्छन्दे—'दिव्यं तु करणं कृत्वा तत्त्वस्योच्चारणं कुरु' इत्यादि । सर्वेषां प्रणवशब्दब्रह्म-तत्त्ववाचिस्वरूपपरामर्शनमुखेनैव ते वाचके तत्स्वरूपानतिक्रमम् ॥

प्रातःसंध्यारुणकिरणभागृङ्मयं राजसं य-
न्मध्ये चापि ज्वलदिव यजुः शुक्लभाः सात्त्विकं वा ।
सायं सामास्तमितकिरणं यत्तमोभासिरूपं
साह्नः सर्गस्थितिलयविधावाकृतिस्ते त्रयीव ॥ २२ ॥

हे भगवन्भास्कर, अह्नः सार्वजनीनस्य प्राणदिनस्य सर्गस्थितिलयविधौ ते संबन्धिनी साकृतिः क्रोडीकृताशेषब्रह्मादिस्तुतिसंपत्त्या त्रयीव विजृम्भत इत्यर्थः । का सा इत्याह—प्रातः हृदुन्मेषात्मनि प्रभाते गुणीभूतप्राणापानवृत्तिः शिवशक्तिसंघट्टात्मा या संध्या तत्र ये अरुण-किरणा भानुरश्मयस्तैर्भिन्नाद्यासाः शरीरहृदयचक्षुरादिप्रकाशाख्यानानन्दजाते उदित एव राजसं विश्वरचनात्मकं विश्वप्रसरात्मकं ऋङ्मयं च ऋग्वेदमयम् । मध्ये मध्यदिने स्तुतिरूप मध्ये मध्यमाख्ये यजुर्वेदोक्तपूजात्मकक्रियाशक्तिप्रधानम् । दीप्तेन्धनोपादिव ज्वलत् । ग्रासात्मकसंविद्वह्निज्वालाभिः शुक्लभाः अमलात्मभाः स्वरूपम् । सात्त्विकं च सत्त्वप्रकाशात्मकं तस्येदं संपादकम् । सत्त्वप्रकाशवैशिष्ट्येन विश्वप्रकाशकमित्यर्थः । साय-मुन्मुखीभूतेऽस्तमितकिरणं गलितप्राणादिसंस्कारग्रासात्मकान्तर्मितोऽर्काभिमरीचिनिचयम् । अतश्च निःसंस्कारतुलितकल्पान्तदशेव तमोवस्तु विश्रान्तीकरणसामान्यम् । एवंवि-धं स्वरूपत्रयमत्रत्यं यथासि भासि वा तवाकृतिस्त्रयीव ऋग्यजुःसामात्मिका । तथाहि—प्रातरर्कदेवतास्तुतिप्रधाना ऋग्वेदस्याधिः । मध्ये कर्मानुष्ठानात्मा यजुर्वेदो-दयः । सायं विश्रान्तिहेतुर्गीतिप्रधाना सामवेदप्रधानतेति प्रतिदिनं स्थितिः ॥

---

१. 'सा' ग.

ये पातालोदधिमुनिनगद्वीपलोकाधिवीज-
च्छन्दोभूतस्वरमुखनदत्सप्तसप्तिं प्रपन्नाः।
ये चैकाश्वं निरवयववाग्भावमात्राधिरूढं
ते त्वामेव स्वरगुणकलावर्जितं यान्त्यनश्वम् ॥ २३ ॥

अतलादीनि सप्त पातालानि। क्षीराद्याः सप्तोदधयः। अभ्याद्याः सप्त मुनयः। महेन्द्राद्याः सप्त पर्वताः। जम्ब्वादीनि सप्त द्वीपानि। भूराद्याः सप्तलोकाः। 'मोहो मदश्च गर्वश्च विषादः क्रोध एव च। भयं च हर्षणं चैव देहे सप्ताधयः स्मृताः॥' इत्युक्ता मोहाद्याः सप्ताधयः। यवादीनि सप्त बीजानि। गायत्र्यादीनि सप्त च्छन्दांसि। भूताः प्राप्ताः। एतदामाशत्वात्। ईदृग्विश्वप्रपञ्चरूपा ये षड्जाद्याः सप्त स्वरास्ते मुखेषु येषां ते तन्मुखास्तानेवार्थान्नदन्तो ध्वनन्तः सप्त सप्तयो मनोबुद्धीन्द्रियात्मानोऽश्वा यस्य तादृशं त्वां प्रपन्नाः। ये च निरवयवा वाक् पश्यन्ती तस्या भावः सत्ता तन्मात्राधिरूढं मध्यधामोन्मिषत्पश्यन्त्यामर्शपरिमर्शितम्। अतश्चैकाश्वं च त्वां बुद्ध्वा ये प्रपन्ना उभयेऽपि ते त्वामेवानश्वं चिदर्कं परं ब्रह्म यान्ति त्वदेकतामाप्नुवन्ति। कीदृशम्। स्वरैः षड्जादिभिः गुणैः सत्त्वादिभिः कलाभिरकारादिभिर्वर्जितं निरुपाधिप्रकाशानन्दघनम्। साश्वोपासनानश्वप्राप्तिहेतुरिति विरोधाभासः॥

दिव्यं ज्योतिः सलिलपवनैः पूरयित्वा त्रिलोकी-
मेकीभूतं पुनरपि च तत्सारमादाय गोभिः।
अन्तर्लीनो विशसि वसुधां तद्गतः सूयसेऽन्नं
तच्च प्राणांस्त्वमिति[1] जगतां प्राणभृत्सूर्य आत्मा ॥ २४ ॥

हे भगवन्, त्वं ज्योतिःसलिलपवनैश्चित्प्रकाशकरन्ध्रप्रविशच्छाक्तामृतप्राणमरुद्भि-स्त्रिलोकीं जागरस्वप्नसुषुप्तित्रयीं पूरयित्वा तस्यामेव त्रिलोक्यामेकीभूतं सामरस्यं प्राप्तं दिव्यं सारं तुर्यानन्दघनं गोभिरनुत्तरैर्मरीचिभिः पुनरिति पुनः पुनरादाय चमत्कृत्य अन्तरिति अन्तर्मुखे पदे लीनो वसुधां परां भूतिं विशसि तन्मयतया स्फुरसि तद्गतश्चा-न्नमदनविषयं वेद्यजातं सूयसे आद्यानीभूय तद्रूपतया स्फुरसि। तच्चान्नं प्राणापानाव-स्थितिहेतुस्त्वमेव न त्वन्यत्किंचिदिति। अनया युक्त्या सूर्यः प्राणभृदात्मा च कथ्यसे। यदाह श्रुतिः—'अहमन्नमहमन्नमहमन्नादोऽहमन्नाद' इति। बाह्योऽपि सूर्यो भूर्भुवःस्वस्त्रयीं ज्योतिःसलिलपवनैस्तत्र तत्र समय आपूर्य समरसीभूतं दिव्यं त्रिलोक्यां रसरूपं सारं रश्मिभिर्ग्रीष्मादावादाय पुनरपि भूमिमन्तस्तापनयुक्त्या लीनः सन्विशति। तद्गतश्चान्न-मोषध्याख्यं प्राणावस्थितिहेतुं जनयति। ततः स एवान्नमन्नदोऽन्नादश्च॥

१. 'अस्ति' ख.

अग्नीषोमौ प्रकृतिपुरुषौ बिन्दुनादौ च नित्यौ
प्राणापानावपि दिननिशे ये च सत्यानृते द्वे[1] ।
धर्माधर्मौ सदसदुभयं योऽन्तरावेश्य योगी
वर्तेतात्मन्युपरतमतिर्निर्गुणं[3] त्वां विशेत्सः ॥ २५ ॥

यो योगी नित्यौ सततवाहिनौ प्राणापानावेव क्रमशः आप्यायनदहनहेतुत्वादग्नीषोमौ ज्ञानक्रियाशक्तिप्राधान्यात्प्रकृतिपुरुषौ वेदनविमर्शत्वाद्बिन्दुनादौ प्रसरविश्रान्तिपदत्वाद्दिननिशे विकाससंकोचनिमित्तत्वात्सत्यानृते ऊर्ध्वाधोगतिकारणत्वाद्धर्माधर्मौ बाह्यान्तः सत्तासत्तयोर्व्यापकत्वात्सदसदुभयमन्तर्मध्यदाने धाम्नि आवेश्य विश्रान्त्यात्मनि चिदादित्ये[2] उपरतमतिर्भवेत् स त्वां निर्गुणं सत्त्वादिगुणातीतं परमादित्यं विशत्येव ॥

गर्भाधानप्रसवविषये सुप्तयोरिन्दुभासा
सापत्न्येनाभिमुखमिव खे कान्तयोर्मध्यसंस्थः ।
द्यावापृथ्व्योर्वदनकमले गोमुखैर्बोधयित्वा
पर्यायेणापिबसि भगवन्मद्गुणास्वादलोलः ॥ २६ ॥

हे भगवंश्चिद्भानो, द्यावापृथ्व्योः सर्वद्वादशान्तान्तर्मान्तरिक्षदेहभूम्योः कान्तयोर्नित्यविज्ञानेनैव स्वर्चायितयोः प्राप्तयोर्वदनकमले शक्तिस्थिते गोमुखैः रश्मिभिर्निर्बोधयित्वा विकास्य असामान्यतादात्म्यानन्दास्वादलम्पटः सन् पर्यायेण चित्तोन्मेषनिमेषक्रमैरापिबसि चमत्कुरुषे । कीदृशः । मध्यसंस्थोऽग्नीषोमाधिष्ठितः । किमर्थम् । गर्भे स्वान्तर्विश्वाधानं प्रक्षेपोऽर्थोद्भिन्नस्य प्रसवबहिरीकरणेन स्थापनं तद्विधानार्थम् । कीदृश्योर्द्यावापृथिव्योः । ये शून्यप्रमातरि सुप्तयोः 'कलोद्भिन्नामेनाम् चित्तस्य कर्तृतापदम् । अविरूपस्य शून्यांशमतं सुप्ततया स्थितम् ॥' इति नीत्या शून्यप्रधानतावभेदेन निमज्जितपारमार्थिकस्वरूपयोरभिमुखावस्थितयोः । कथं सुप्तयोः । सापत्न्येन परस्परप्रतियोगित्वेनाभिमुखं कृत्वा । उभयानुकूल्यतदाभिमुख्यसाधितेत्यर्थः । बाह्योऽप्ययमर्थो द्यावापृथिव्यौ रात्राविन्दुभासा सुप्तयोर्मीलितस्वरूपयोरभिमुखावस्थितयोर्मध्ये गोभिर्वदनकमले विकास्य तदीयचित्रप्रसरास्वादलोलः आपिबति सीमान्तरितान्तरगाम् । गर्भाधानाय ग्रीष्मादौ कर्कट्यादिनिजरश्मिप्रसरनिवेशनाय । प्रावृडादौ च प्रसवाय वर्षेणादिमरीचिविसरणेनो नानीरप्युतये । अपि च सापत्न्येनाभिमुखयोः सुप्तयोरिन्दुभासोपलक्षितयोः कनुरागाकुलितयोः कान्तयोर्मध्यसंस्थो नायको वैदग्ध्यात्क्रमयोर्वैकपदे पर्यायेण युगपद्बोधयित्वा लोचनपरिचुम्बनानुरागमुद्रां विधाय प्रकाशवानुतकम्पादौ गर्भाधानप्रसवनिमित्तमापिबति स्वाद्वेऽप्यर्थं परिचुम्बतीति श्लेषालंकारः श्लेषवानेवंविधश्च ॥

१. 'च' ख. २. 'आदित्य' ख. ३. 'निर्गुणः' ख.

सोमं पूर्णामृतमिव चरुं तेजसा साधयित्वा
कृत्वा तेनानलमुखजगत्तर्पणं वैश्वदेवम्।
आमावस्यं विघसमिव खे तत्कलाशेषमश्न-
न्ब्रह्माण्डान्तर्गृहपतिरिव स्वात्मयागं करोषि ॥ २७ ॥

हे चिदर्क। ब्रह्मरन्ध्रावस्थितशाक्तब्रह्मोपलक्षितस्याण्डस्य अन्तरिति धरामूलमायाशक्त्यण्डचतुष्टयस्य मध्ये गृहे स्वात्मयागं करोषि। किं कृत्वा। सोमं रूपादिपञ्चदशात्मकमेयं तेजसा निजमरीचिविस्फुरणेन पूर्णामृतं चरुमिव साधयित्वा 'एकैकत्र च तत्त्वेऽपि षट्त्रिंशत्तत्त्वरूपता' इतिकृत्वा विश्वात्मनिजशाक्तामृताभासमयं स्वसंनिविष्टं विधाय। अनल उदानवह्निर्मुखं प्राप्त्युपायो यस्य ब्रह्माद्यनाश्रितान्तकारणाधिष्ठितधरादिशिवतत्त्वान्ताध्वविस्फारमयस्य जगतस्तस्य तर्पणं यत्तदेव वैश्वदेवं यागं तेन सोमेन चरुणा विधाय तस्य सोमस्य कलाशेषं जगत्तर्पणोपयुक्तकलापञ्चदशावशिष्टमूर्ध्वत्र्युव्यर्धाख्यामावस्यासंबन्धि अमाख्यकलारूपं विघसमिव कवलिताशेषसंस्कारकल्पमिवाश्नन्। 'अमृतं चन्द्ररूपेण द्विधा षोडशधा पुनः। पिबन्ति च सुराः सर्वे दश पञ्च पराः कलाः ॥ अमाशेषगुहान्तःस्थामावस्या विश्वतर्पिणी ॥' इति श्रीकालिकाक्रमादिष्टनीत्या विश्वदेवतापरमार्थे स्वात्मनि चमत्कुर्वन्। कीदृक् त्वम्। गृहपतिरिव। सोऽपि हि पूर्णामृतकल्पमामावस्यं चरुं प्रसाध्य तेनाग्निप्रमुखसर्वजगत्तर्पणं वैश्वदेवं च कृत्वा तच्छेषमश्नन्स्वात्मदेवतायागं करोति। बाह्योऽपि सूर्यः स्वरश्मितापप्रद्रावितसोमकलापञ्चदशकेन देवर्षिनरात्मजगत्तर्पणं विधायामाख्यकलाचमत्करणात्मस्वात्मयागं ब्रह्माण्डस्यान्तर्विधत्ते ॥

कृत्वा नक्तंदिनमिव जगद्बीजमाव्यक्तिकं य-
त्तत्रैवान्तर्दिनकर तथा ब्राह्ममन्यत्ततोऽल्पम्।
दैवं पित्र्यं क्रमपरिगतं मानुषं चाल्पमल्पं
कुर्वन्कुर्वन्कलयसि जगत्पञ्चधावर्तनाभिः ॥ २८ ॥

हे दिनकर विश्वोदयकारिदिवससंपादक चिद्भानो, जगतः सदाशिवान्तस्य विश्वस्य यद्बीजमारम्भावसानयोरुदयापवर्गकारणं श्रीस्वच्छन्दादिष्टविततपरार्धात्मकालरूपमहोरात्रं तत्कृत्वाभास्य तत्रैवान्तर्जगतः कलादिक्षित्यन्तस्याशुद्धाध्वरूपस्य बीजं मायेयमहोरात्रं तदन्तरप्याव्यक्तिकं प्राकृतं तदन्तरपि ब्राह्मं तत्रापि दैवं तत्रापि पित्र्यं प्रेत(पितृ)संबन्धि तत्रापि मानुषं क्रमेणाल्पमल्पं कुर्वन्कुर्वन्निव वैचित्र्यसहस्रैराभासयन्निव जगद्विश्वं पञ्चधावर्तनाभिर्विचित्रजागरादिदशापञ्चकपरावर्तनैः कलयसि अन्तरवस्थितं बहिः क्षिपसि। निर्मिमीषे निर्मितं च कलयसि। इदमित्थमिदमिदमिति संख्यानेन स्थापयसि। स्थापितमपि कलयसि अन्तःसंहरसि। संहृतमपि कलयसि संस्कारगालनेन विमृशसि। विमृष्टमपि कलयसि स्वात्माभेदेन जानीषे स्वप्रकाशैकात्म्यमापादयसि। तथा

१. 'आमावास्यं' ख.

पुनरपि सहस्रान्कल्पयति नवं नवमुद्भासयति । इत्येवं सर्गस्थितिसंहृतिविलापनमार्ग-क्रमागमनपरम्परान्दोलनलीलाकान्तं करोषि । अत्र जगद्बीजभावत्वं द्विधोच्यम् । अन्यमन्यमिति वीप्सायामयमाशयः—यथास्य यावदहोरात्रं तत्तदीये प्राक्चारे तदंशां-शकलानपि वा श्रीमच्छन्दादितस्माद्वादित्यब्दोदयान्तप्रक्रियया योगिज्ञानापेक्षयाति-परिमितमाभासयति भगवान्, तत्राप्यन्तर्बहिःप्राणप्रसरणात्मायादाशिवान्तात्मकालकलनामयी-षामाभासवर्तीत्वाभासमानोऽयं कालो न तस्य वास्तवं किंचित्तत्त्वमस्ति । अतएव कुर्वन्निर्विकल्पयन्नेतावानेवार्थः स्पष्टः । वस्तुतो ह्येतावद्विभोदयाकल्पान्तविकासस्वप्रकाशः परमेश्वर एवेति स्फुरति । न तु चिदेकरूपस्वतोऽप्रतिदिनं किमप्यस्ति । अत्र च मा-नुषाद्यहोरात्रप्रमाणं श्रीस्वच्छन्दे चोक्तम् । तद्यथा—'मुहूर्तास्तु तथा त्रिंशदहोरात्रस्तु मानुषः । दक्षिणं चायनं रात्रिरुत्तरं चायनं दिनम् ॥ पितॄणां तदहोरात्रमनेनाब्दं तु पूर्ववत् । एवं दैवस्त्वहोरात्रः' इति । यस्त्विह दैवं दिव्यं युगचतुष्कं तत्सहस्रेणैकब्राह्मोऽहोरात्रो ब्रह्मः । तेषां ब्रह्महन्यामध्यो हि सः । किं च—'कल्पो ब्राह्मदिनं प्रोक्तं चतुर्युगसहस्रकम् । षट्त्रिंशत्तु सहस्राणि ब्रह्मणः प्रलयोद्भवः ॥ अव्यक्तसर्गेषु सर्वेषु दिनरात्रिश्च तावती । प्राधानिकपरार्धेन दशधा गुणितेन तु ॥ मायां संहरते सर्वं पुनरेव सृजेज्जगत् ॥' इति । तथा—'शक्तिकालपरार्धस्य कोटिधा गुणितस्य च । अनाश्रितस्य देवस्य दिनमेतत्प्रकी-र्तितम् ॥' इत्येवमादि । तदेवमत्र प्राक्चारे पाठिकोदयात्प्रभृति यथाब्दोदयान्तं कियत् तत्राधिकं प्रत्ययोरचनयात्र दर्शितम् । एवमहोरात्रहेतुत्वेन जगद्विपरिवर्तकत्वं भगवत उक्तम् ॥

ये त्वहोरात्रप्रवाहे स्थास्ते योगोत्तमा एवेत्याह—

तत्त्वालोके तपन सुदिने ये परं संप्रबुद्धा
ये वा चित्तोपशमरजनीयोगनिद्रामुपेताः ।
तेऽह्नोरात्रोपरमपरमानन्दसंध्यासु सौरं
भित्त्वा ज्योतिः परमपरमं यान्ति निर्वाणसंज्ञम् ॥ २९ ॥

हे तपन महाप्रकाशक, ये योगिनस्तत्त्वालोकात्मनि योऽसावस्मिन्नोदितेऽस्तमिते दिने पारमार्थिके सर्वदानुत्थूते सर्वतोमुखे चित्प्रकाशे सम्यक्प्राणापानाभावात् किल विमर्शयुक्तया प्रबुद्धा मलिताश्मतिनामिलिताः । ये चान्ये चित्तोपशम एव सर्वेषाम-भ्यासनिवृत्तिहेतुत्वाद्रजनी । तस्यां योगनिद्रामुपेताः । प्रशमितविकल्पसविकल्पप्रकाशै-क्यमापन्नाः । उभयेऽपि ते प्राग्वर्णितस्वरूपाहोरात्रोपरम एव परमानन्दरूपाः संध्या-निमज्जत्प्राणापानाभिधदिवसात्मरस्वघुरः सर्वतोदिक्समुदितात्मतया सौरमिति प्राणीयमपर-ममिति स्थूलं ज्योतिः संकुचितं प्रकाशं भित्त्वा निःसंस्कारं विकाश्य परं निर्वाणमार्गं यान्ति सदा परं शाक्तं धामाभिव्यक्ते ॥

न केवलं चित्रं कालकलनाकालकलिताकलनापत्ति च दर्शयति, यावत्प्र-दुदयापायावपीत्याह—

आ ब्रह्मेदं नवमिव जगज्जङ्गमस्थावरान्तं
सर्गे सर्गे विसृजसि रवे गोभिरुद्रिक्तसोमैः ।
दीप्तैः प्रत्याहरसि च लये तद्यथायोनि भूयः
सर्गान्तादौ प्रकटविभवां दर्शयन्रश्मिलीलाम् ॥ ३० ॥

आब्रह्मणः शाक्ताद्रूपादाब्रह्म निजं परं शाक्तं रूपं वर्जयित्वा इदं सर्वं सादाशिवादिक्षित्यन्तं जङ्गमस्थावरे अन्तौ भागौ यस्य तादृग्जगत्सर्गे सर्गे प्रथमेच्छोन्मेषात्मन्यादिसर्गे भूयो भूय उद्रिक्तसोमैः स्फीतशाक्तामृतैर्गोभिर्मरीचिभिर्विसृजसि आश्यानीभूतं निजरश्मिरूपं प्रकटयसि । भूयो दीप्तैरग्निप्रधानैर्गोभिस्तज्जगद्यथायोनि प्रत्याहरसि स्वस्वातन्त्र्यावभासिततत्तत्कारणनिवेशपुरःसरं लये स्वचिदैक्याभासनात्मनि संहारे प्रतीपमाहरसि चिदेकमयमेव करोषि । किं कुर्वन् । सर्गस्य सृष्टेरादौ अन्ते प्रकटविभवां स्फुटमाहात्म्यां रश्मिलीलां प्रकटयन्निजमरीचिविलासमाभासयन् ॥

श्रित्वा नित्योपचितमुचितं ब्रह्मतेजःप्रकाशं
रूपं सर्गस्थितिलयमुचा सर्वभूतेषु मध्ये ।
अन्तेवासिष्विव सुगुरुणा यः परोक्षः प्रकृत्या
प्रत्यक्षोऽसौ जगति भवता दर्शितः स्वात्मनात्मा ॥ ३१ ॥

हे भगवन्, यः प्रकृत्या स्वभावेन परोक्षोऽक्षागोचर आत्मा असौ जगति सर्वभूतेषु मध्ये भवतान्तेवासिषु अनुग्राह्येषु आत्मनैव प्रत्यक्षो दर्शितः स्वप्रकाशतया प्रकटीकृतः । किं कृत्वा । नित्योपचितं सदा परिपूर्णमुचितं चिदानन्दघनं रूपं श्रित्वा देहादिनिमज्जनेनोन्मग्नं विधाय । कीदृग्रूपम् । ब्रह्मतेजःप्रकाशं बृहत्त्वाद्बृंहकत्वाच्च ब्रह्म द्वैतदाहित्वात्तेजो यस्य तादृशः प्रकाशः प्रथा यस्य । कीदृशेन भवता । सर्गस्थितिलयमुचा जननादिशून्येन यथान्तेवासिषु शिष्येषु शोभनेन दृष्टतत्त्वेन गुरुणा आत्मा दर्श्यते चिन्मयी सत्ता प्रकटीक्रियते । तथा त्वयान्तः परमात्मतया बहिश्च तेजो विश्वरूपतया स्वयमात्मा प्रकटीक्रियते ॥

लोकाः सर्वे वपुषि नियतं ते स्थितास्त्वं च तेषामेकैकस्मिन्युगपदगुणो विश्वहेतोर्गुणीव ।
इत्थंभूते भवति भगवन्न त्वदन्योऽस्ति सत्यं
किं तु ज्ञस्त्वं परमपुरुषोऽहं प्रकृत्यैव चाज्ञः ॥ ३२ ॥

हे भगवन् परानन्दात्मक स्वातन्त्र्यशक्तिस्वरूप परावागालिङ्गितमूर्ते, ते तव विश्वहेतोरशेषकारणस्य वपुषि प्रकाशानन्दघने स्वरूपे सर्वे लोका लोक्यमानाः पदार्थाः, लोकयितारश्च रुद्रक्षेत्रज्ञरूपाः प्रमातारः स्थिताः । त्वच्चिदात्मिकां सत्तां विना हि कथ-

नैते स्वतो विश्वहेतोर्महेशुः । तेषां च लोकानां संबन्धिनोऽनेकविज्ञानेऽप्युपि त्वं युगपदक्रमेणैव स्थितः । अन्यथा ते त्वत्प्रकाशतां विना हि कथं प्रकाशेरन् । अतश्च त्वं सत्त्वादिगुणहीनोऽपि विश्वात्मताभागगुणाद्गुणीभावाभाति । इत्यनुपवर्णिते विश्वात्मनि भवति याति सत्त्वमपि नान्यः । किं तु त्वमेवंभूतः परमः पुरुषो यः परिपूर्णः सार्वज्ञ्यादिधर्मैः । अहमिति त्वमेव देहादिषु प्राहितप्रमातृभावः प्रकृत्या त्वन्मायामाहात्म्यादज्ञः । अतश्च देहादिप्रमातृतानिमज्जनेनाहन्ता प्रथमस्य नित्यं स्वात्मसमावेशेन ज्ञातुं सर्वोत्कर्षेणैतदर्थं भवति ॥

संकल्पेच्छाद्यखिलकरणप्राणवाय्वो वरेण्याः
संपन्ना मे त्वदभिनवनाज्जन्म चेदं शरण्यम् ।
मन्ये चाल्पं जिगमिषु शनैः पुण्यपापद्वयं ते-
भक्तिश्रद्धे तव चरणयोरन्यथा नो भवेताम् ॥ ३३ ॥

इत्यनल्पमपि मे त्वदभिनवनाभिधानाभिमुखप्रणतपरामर्शात्मस्तुतिवशात् । संकल्पः स्थूलेच्छा । इच्छा संकल्पकारणभूता सूक्ष्मविकल्परूपपरामर्शात्मा । आदिग्रहणात्प्रयत्नप्रसादनन्तरमालोचनादानादिप्रवृत्तानि बाह्याभ्यन्तराणि करणानि सत्त्वादृष्टिः प्राणः, सर्वत्रात्र सूक्ष्मपरामर्शरूपतया व्यापकत्वेन स्थिता वाणी चेत्येते मम वरेण्ये परानुग्रहे साधवो वरेण्या जाताः तथेदमिति पवित्रजन्म शरण्यं शरणे साधु अनुग्राह्यानुग्रहैकपरं संपन्नम् । अहं हि सर्वदैवाम् चिदेकघनसंपरः परानन्दानुग्रहनिष्ठतः । किं च मन्ये त्वानुभवैर्नैवैतत्तावे पुण्यपापद्वयं सुकृतदुष्कृतरूपं सर्वं तदित्थंजन्मान्तरजन्मार्जितं शनैरल्पं जिगमिषु हिमविलायं विलीयमानं स्थितम् । प्रारब्धेतरसर्वकर्मणां हि नाशेऽपि देहारम्भककर्मणां भोगेनैव क्षयाभिप्रायेणेत्युक्तम् । अन्यथेति । यदि नैवं स्यात्तत्कथं भवच्चरणयोर्भक्तिश्रद्धे भवेताम् । नैव स्याताम् । यदुक्तं नन्दिशिखायाम्—'यावत् क्षिप्येऽनिवार्यो वै जायते च नृणां सदा । तदा शिवाभिमानाश्चैते जायन्ते परमाणवः ॥ मुक्तावधिश्च ते दीक्षां प्राप्नुवन्ति गुरोर्मुखात् ।' इति ॥

सत्यं भूयो जननमरणे त्वत्प्रपन्नेषु न स्त-
स्तत्राप्येकं तव नुतिफलं जन्म याचे तदित्थम् ।
त्रैलोक्येशः शम इव परः पुण्यकायोऽप्ययोनिः
संसाराब्धौ प्लव इव जगत्तारणाय स्थिरः स्याम् ॥ ३४ ॥

हे देव, यद्यपि त्वत्प्रपन्नेषु त्वत्समाविष्टेषु संसारहेतुकर्मवासनादाहात् भूयो जननमरणे न स्तस्तथापि त्वत्स्तुतिफलस्तुतिरिव फलं मम तादृगिदमेकं पवित्रजन्म याचे । यथा भवदनवधिनिजचमत्कारायापि पुनरास्वादात् । तदित्थमनेनैव त्वत्स्तुतिरसावेशेन प्रका-

१. 'वरेण्यः' ख. २. 'वा' ख. ३. 'वाचिदृशमित्थम्' ख. ४. 'त्रैगुण्येशः' ख.

रेणास्मिन्नेव देहे परः शम इव शाम्यत्यस्मिन्विश्वमिति व्युत्पत्त्या परः शंकरात्मस्वभाव इव जाग्रत्स्वप्नसुषुप्तात्मनि त्रैलोक्ये ईशः प्रभुः । न तु परतन्त्रः । अत एव पुण्यो दर्शनस्पर्शनादिना परानुग्राही कायो यस्य तादृक् । अयोनिरिति नित्योदितचिदानन्दैकघनः सन्, जगतो विश्वस्य तारणाय संसाराब्धिमध्ये प्लव इव पोत इव स्थिरः स्यां चिरकालं भूयासम् ॥

सौषुम्णेन त्वममृतपथेनैत्य शीतांशुभावं
पुष्णास्यग्रे सुरनरपितॄञ्शान्तभाभिः कलाभिः ।
पश्चादम्भो विशसि विविधाश्चौषधीस्तद्गतोऽपि
प्रीणास्येवं त्रिभुवनमतस्ते जगन्मित्रतार्क ॥ ३५ ॥

हे अर्क, अतो हेतोस्ते जगतो मित्रता यौगिकमित्रशब्दाभिधेयत्वम्, यतस्त्वं सौषुम्णेन मध्यमेनामृतपथेनाप्यायिना मार्गेण शीतांशुभावमपानचन्द्रत्वमेत्यागत्याग्रे प्रथमं सुरादीन्सर्वान्प्रमातॄन्पुष्णासि लब्धावस्थितीन्करोषि । केन शान्तभाभिरन्तर्मुखीभावेनोपसंहृतबाह्यप्रथाभिः कलाभिरादिविसर्गान्तस्वाभाविमर्शशक्तिभिः । पश्चादनन्तरमम्भ इति बहिः प्रसरप्रवृत्तान्सर्ववाहान्विशसि स्वामृताच्छुरितान्करोषि । विविधाश्चौषधीर्विशसि स्थावरादिसर्वबाह्याभासान्स्वप्रकाशापूरितान्विधत्से । तद्गतो मेयप्रपञ्चात्मतया स्फुरितोऽपि त्रिभुवनं विश्वमेवमिति तदाभासनविमर्शनयुक्त्यैव चन्द्रत्वमेत्य पूर्वोक्तनीत्या सुरादीन्प्रीणासि तर्पयसि । बाह्योऽप्यर्कः सुषुम्णामार्गेणामृतसंक्रमणयुक्त्या चन्द्रत्वमेत्य पूर्वोक्तनीत्या सुरादीन्पुष्णाति । शान्तभाभिर्निवृत्तदीप्तिभिः कलाभिः शक्तिभिरम्भो विशति दक्षिणायने आसाररूपतां स्वीकरोति । ओषधीश्च विशति सरसाः करोति । तद्गतश्च वैश्वदेवयागानुयागक्रमेण त्रिभुवनं पुष्णञ्जगन्मित्रत्वमेव दर्शयति ॥

मन्दाक्रान्ते तमसि भवता नाथ दोषावसाने
नान्तर्लीना मम मतिरियं गाढनिद्रां जहाति ।
तस्मादस्तंगमिततमसा पद्मिनीवात्मभासा
सौरीत्येषा दिनकर परं नीयतामाशु बोधम् ॥ ३६ ॥

हे नाथ दिनकर स्वामिन् चिदर्क, त्वया तमस्यज्ञाने मन्दाक्रान्ते निर्मूलनायाघ्राते सति इयं मदीया मतिर्धी रागद्वेषाणामवसाने जातेऽपि अन्तर्लीनान्तर्मुखीभूतापि गाढनिद्रां त्वदभेदाख्यातिं न जहाति । तस्मादेषा त्वया अस्तंगमितं तमो यया तादृश्यात्मभासा स्वदीप्त्या कारणभूतया आश्वविलम्बितमेव परं बोधं प्रशान्ताख्यातिनिजज्योतिरात्मतां नीयतां प्राप्यताम् । सूर्यो देवता यस्याः सा सौरीति कृत्वा पद्मिनीव नलिनीव । सापि त्वया दोषावसाने प्रभाते तमसि मन्दाक्रान्तेऽन्तर्लीना कर्णिकासंश्लिष्टदला गाढनिद्रां न जहातीत्यस्तंगमिततमसा स्वात्मभासा गाढीभूतज्योतिषा प्रबोध्यते त्वया ॥

१. 'शाश्वतीभिः' ख. २. 'गूढनिद्रां' ख.

येन ग्रासीकृतमिव जगत्सर्वमासीत्तदन्तं
ध्वान्तं नीत्वा पुनरपि विभो तद्दयाघ्रातचित्तः ।
धत्से नक्तंदिनमपि गती शुक्लकृष्णे विभज्य
त्राता तस्माद्भव परिभवे दुष्कृते मेऽपि भानो ॥ ३७ ॥

हे विभो भानो चित्तरोचिर्मालिन्, येन तमसाङ्केन जगदिदं ग्रासीकृतमासीत्, तदनुगृहीतान्धतमसं नीत्वा विनाश्य तद्दयाघ्रातचित्त इव तदनुकम्पयैव शुक्लकृष्णगती विभज्य व्युत्थानावसरे प्राणापानभूमिकामवलम्ब्य तद्ध्वान्तं पुनरपि धत्से पुष्णासि । निर्व्युत्थानं समाधिं प्रविशति न विशेषोऽस्त्यर्थः । यथा भानो नानुग्रासीकृतजगत्तिमिरं विनाश्य पुनर्दयवैव नक्तंदिनं निशादिने विभज्य धत्से पुष्णासीति श्लेषोपमा । यत एवं दुरात्मनि तमस्यपि त्वमनुकम्पावानसि ततो मे मम परिभवे व्युत्थानात्मनि क्लेशेऽपि त्राता रक्षिता भव । कीदृशे परिभवे । दुष्कृते दुष्टं कृतं करणं विषयदानादानादिपरिणतो यत्र । निर्व्युत्थानसमावेशरसास्वादिनं मां कुर्वित्यर्थः ॥

व्युत्थितः समावेशमप्राप्नुवन्व्युत्थानदशानिर्भर्त्सनपरः समावेशाय भगवन्तं प्रार्थयितुमाह—

आसंसारोपचितसदसत्कर्मबन्धाश्रिताना-
माधिव्याधिप्रजनमरणक्षुत्पिपासार्दितानाम् ।
मिथ्याज्ञानप्रबलतमसा नाथ चान्धीकृतानां
त्वं नस्त्राता भव करुणया यत्रतत्रग्रसितानाम् ॥ ३८ ॥

सत्पुण्यम् । असत्पापम् । यत्रतत्रग्रसितानामिति देशे कालेऽवस्थाविभिन्ने च त्राता समावेशप्रदानेन रक्षकः । शिष्टं स्पष्टम् ॥

सत्यासत्यस्खलितवचसां शौचलेशोज्झिताना-
मज्ञानानामफलसफलप्रार्थनाकातराणाम् ।
सर्वावस्थास्वखिलविषयाभ्यस्तकौतूहलानां
त्वं नस्त्राता भव पितृतया भोगलोलार्भकाणाम् ॥ ३९ ॥

भोगेषु विषयसुखेषु लम्पटानामस्माकमर्भकाणां बालानामिव त्वं पितृतया जनकत्वेन त्राता भवेति प्रार्थना । त्वं ह्यस्माकं तत्त्वतोऽपि जनकः । सत्यासत्येत्युभयत्र वचनम् । स्खलितं प्रमादि एकत्र, अन्यत्रास्पष्टवर्णकम् । एवं शौचं चित्तं शारीरं च । अफला सफला च या प्रार्थना तया कातराणामधीराणाम् । यत्प्रार्थयमानानामिति सुबोधमन्यत् ॥

१. 'दिवमिव' ख. २. 'छलोज्झितानां' ख.

यावद्देहं जरयति जरा नान्तकादेत्य दूती
नो वा भीमस्त्रिफणभुजगाकारदुर्वारपाशः ।
गाढं कण्ठे लगति सहसा जीवितं लेलिहान-
स्तावद्भक्ताभयद सदयं श्रेयसे नः प्रसीद ॥ ४० ॥

हे भक्ताभयद, यावद्व्युत्थिता मरणावसानां दुर्दशां नाप्नुमस्तावन्नोऽस्माकं प्रसीद देहादिसंस्कारकालुष्यप्रशमनेन निर्मलीभव । निर्व्युत्थानप्रकाशानन्दघनपरमसमावेशामृतरसास्वादसुखितानस्मान्संपादयेत्यर्थः । स्पष्टमन्यत् ॥

विश्वप्राणग्रसनरसनाटोपकोपप्रगल्भं
मृत्योर्वक्त्रं दहननयनोद्दामदंष्ट्राकरालम् ।
यावद्दृष्ट्वा व्रजति न भिया पञ्चतामेष काय-
स्तावन्नित्यामृतमय रवे पाहि नः कांदिशीकान् ॥ ४१ ॥

मृत्योरन्तकस्य वक्त्रं दृष्ट्वा यावदेष काय इति सपुर्यष्टको देहो भिया भीत्या पञ्चतां मृत्युं न व्रजति तावदेव रवे चिदर्क नित्यामृतमय अनस्तमितपरमानन्दैकघनस्वभाव, नोऽस्मान्कांदिशीकान्व्युत्थाने त्वत्समावेशप्राप्तिं विना कां दिशं कायतः का दिक्का दिगस्माकमिति क्रन्दतः पाहि निर्व्युत्थानसमावेशान्संपादय । कीदृङ्मृत्योर्वक्त्रम् । विश्वेषां प्राणग्रसनो जीवितभक्षको रसनाटोपो लोलरसनाव्यापारो यस्य तादृशि कोपे प्रगल्भं प्रौढम् । तथा दहनानि प्लोषकाणि नयनानि यस्य तादृक् । तथा उद्दामाभिरूर्जिताभिर्दंष्ट्राभिः करालम् ॥

शब्दाकारं वियदिव वपुस्ते यजुःसामधाम्नः
सप्तच्छन्दांस्यपि च तुरगा ऋङ्मयं मण्डलं च ।
एवं सर्वश्रुतिमयतया मद्दयानुग्रहाद्वा
क्षिप्रं मत्तः कृपणकरुणाक्रन्दमाकर्णयेमम् ॥ ४२ ॥

हे भगवन्, ते तव निर्णीतदृशा सामवेदात्मकं धाम तेजो यस्य तादृशः । यजुर्वेदात्मकं शब्दाकारं वपुः शरीरं वियदिव व्यापकम् । तदपि शब्दाकारमिति शब्दानाकरोति समस्तशब्दाश्रयः । अपि च गायत्र्यादि सप्तच्छन्दांसि ते तुरगाः । मण्डलं प्रभापरिवेषोऽपि ऋग्वेदमय इत्येवं सर्वश्रुतिमयत्वात्, यद्वा अनुकम्पाप्रधानादनुग्रहान्मत्तो मत्सकाशादुक्तवक्ष्यमाणप्रार्थनापरत्वात्कृपणं विरसं संसारविभावकत्वाच्च करुणं करुणरसप्रधानमिममाक्रन्दं त्वत्प्रसादप्रार्थनापरं प्रलपितं क्षिप्रमुदीरणानन्तरमेवाकर्णय करुणयास्मदनुजिघृक्षयावधारय ॥

---

१. 'दैत्यदूती' ख. २. 'त्रिफल' ख.

नाशं नाल्पशरणशरणा यान्त्यपि ग्रस्यमाना
देवैरित्थं सितमिव यशो दर्शयन्स्वं त्रिलोक्याम् ।
मन्ये सोमं क्षततनुममागर्भवृद्ध्या विवस्व-
न्शुक्लच्छायां नयसि शनकैः स्वां सुषुम्णांशुभासा ॥ ४३ ॥

हे भगवन् विवस्वन् चिद्भानो, अल्पशरणशरणा देवैरपि ग्रस्यमाना नाशं न यान्ति इत्येवं सितं शुभ्रं यशस्त्रिलोक्यां दर्शयन्निव सोमं क्षततनुं देवैरपि ग्रस्यमानत्वात् सुषुम्णाख्यरश्मिनाम्ना अंशुना भासा दीप्त्या हेतुभूतया अमागर्भवृद्ध्या शनैः शनैरन्तर्या वृद्धिस्तया स्वां शुभ्रां छायां संपूर्णतां कान्तिं नयसि प्रापयसीति मन्ये जानामि । अत्र रहस्यदृशा देवा इन्द्रियाणि सोमोऽपानचन्द्रात्मा प्रमितिः षोडशकलात्मा मेयवर्गः सर्वसंहारोत्थसंयुक्तत्वात् कलाप्रवेशेन क्षीणकलः सन्, सुषुम्णांशुभासा मध्यधामस्फारेणोन्मिषच्चतुर्थप्रकाशदीप्त्या अमाया अन्तर्मुखस्वरूपोल्लसत्तेजोगर्भे-ऽन्तर्या वृद्धिः प्राणादिप्राधान्यनिमेषोन्मिषच्छायावर्धनभानिः स्फुरिता तया शुभ्रां चिदेकघनां नयसि प्रापयसीत्यर्थः । बाह्यस्तु स्पष्टः ॥

आस्तां जन्मप्रभृति भवतः सेवनं तद्धि लोके
वाच्यं केनापरिमितफलं भुक्तिमुक्तिप्रकारम् ।
ज्योतिर्मात्रं स्मृतिपथमितो जीवितान्तेऽपि भास्व-
न्निर्वाणाय प्रभवसि सतां तेन ते कः समोऽन्यः ॥ ४४ ॥

हे भगवन्, जन्मप्रभृति यत्त्वत्सेवनं तदपरिमितफलं केन वाच्यं केन वक्तुं शक्यम् । इयत्तया परिच्छेदफलाभावात् । तदस्माद्भुक्तिमुक्तिप्रकारं भुक्तिर्विषयभोग एव स्वात्मानन्दविश्रान्तिदर्शनेन जीवन्मुक्तताभिव्यक्त्यात्मा मुक्तिरेव च विश्वमस्यासमावेशरूपा भुक्तिः । न तु विषयासक्तिरूपा । तां भुक्तिं मुक्तिं प्रकाशयति सेवकाभ्यन्तरसान्द्रोत्पादयति जीवितान्ते निर्वाणावसरेऽपि ज्योतिर्मात्रात्मा त्वं सतां स्मृतिपथं प्राप्तो निर्वाणाय मुक्तये प्रभवसि । अतस्ते समः कोऽन्यः । असमान्यमहिमासीत्यर्थः ॥

अप्रत्यक्षत्रिदशभजनाद्यत्परोक्षं फलं त-
त्पुंसां युक्तं भवति हि समं कारणेनैव कार्यम् ।
प्रत्यक्षस्त्वं सकलजगतां येऽसमक्षं फलं मे
युष्मद्भक्तेः समुचितमतस्तत्त्व याचे यथा त्वाम् ॥ ४५ ॥

अप्रत्यक्षेन्द्रचन्द्रादिदेवताराधनादाराधकानां यत्स्वर्गप्राप्त्यादि परोक्षं कालान्तरे भावि फलं तद्युक्तम् । यतो मृद इव मृन्मयो घटः कारणोचितमेव सर्वत्र कार्यं भवति । त्वं

१. 'क्षिततनु' ख. २. 'भाजः' ख. ३. 'तत्' ख. ४. 'त्वां तु याचे यथावत्' ख

तु चिदर्कः सर्वेषां प्रत्यक्षः स्वप्रकाशः । चिदर्कस्वप्रकाशात्मतां विना कस्याप्यप्रकाशादिति । त्वद्भक्तेर्हेतोर्मम नित्योदितत्वत्समावेशात्मफलं समुचितम् । अतो हेतोस्तत्फलं याचे प्रार्थये । यथाकृतिमतीषु देवतासु सतीषु त्वामेव याचे तथा निर्व्युत्थानसमावेशात्मैव फलं याचे । न तु मितं किंचित् ॥

ये चारोग्यं दिशति भगवान्सेवितोऽप्येवमाहु-
स्ते तत्त्वज्ञा जगति सुभगा भोगयोगप्रधानाः ।
भुक्तेर्मुक्तेरपि च जगतां यच्च पूर्णं सुखानां
तस्यान्योऽर्कादमृतवपुषः को हि नामास्तु दाता ॥ ४६ ॥

येऽपि च केचिदविमृष्टसमावेशात्ममुख्यफला भगवान्सेवित आरोग्यं दिशतीत्याहुस्तेऽपि जगति तत्त्वज्ञाश्च सुभगाश्च । यतो भोगयोगप्रधाना भोगाय योगाय चारोग्यं वाञ्छन्ति । युक्तं चैतत् । यतोऽमृतवपुषः परानन्दप्रकाशघनाच्चिदर्कादन्यः को नाम भोगमोक्षयोस्तदाश्रयस्य पूर्णसुखात्मन आरोग्यस्य च दाता । न कश्चित् । 'पूरणगुणसुहितार्थ–' इति तृप्त्यर्थैः सह षष्ठीसमासनिषेधाज्ज्ञापकात्सुखानांपूर्णमित्यत्र षष्ठी ॥

हित्वा हित्वा गुरुचपलतामप्यनेकान्निजार्था-
न्यैरेकार्थीकृतमिव भवत्सेवनं मत्प्रियार्थम् ।
तेषामिच्छाम्युपकृतिमहं स्वेन्द्रियाणां प्रियाणा-
मादौ तस्मान्मम दिनपते देहि तेभ्यः प्रसादम् ॥ ४७ ॥

हे दिनपते चिद्भानो, यैरिन्द्रियैरन्तर्बहिःकरणैर्गुर्वीं चपलतां महतीमनवस्थितिं पुनः पुनः प्रवृत्तामपि तथानेकान्निजार्थान्विषयविश्रान्त्यात्मकानि नानास्वप्रयोजनानि हित्वा त्यक्त्वा भवत्सेवनमन्तर्मुखीभावयुक्त्या त्वत्परिशीलनं मम प्रियार्थमेवैकार्थीकृतमभिनिवेशेनाश्रितम् । तेषां प्रियाणां स्वेन्द्रियाणामहमुपकारमिच्छामि । तस्मान्ममादौ तेभ्यः प्रसादं देहि । मायीयदेहपरिहारेण निजमरीचिचक्रात्मतां प्रकटयेत्यर्थः ॥

किं तन्नामोच्चरति वचनं यस्य नोच्चारकस्त्वं
किं तद्वाच्यं सकलवचसां विश्वमूर्ते न यत्त्वम् ।
तस्मादुक्तं यदपि तदपि त्वन्नुतौ भक्तियोगा-
दस्माभिस्तद्भवतु भगवंस्त्वत्प्रसादेन धन्यम् ॥ ४८ ॥

हे विश्वमूर्ते अनवच्छिन्न, त्वन्नुतिविषये इदन्तावच्छेदप्रधानतया असमञ्जसप्रायं किमप्यस्माभिस्त्वद्भक्तित उक्तं तद्विश्वस्य वाच्यवाचकात्मनस्तव प्रसादादन्तर्नैर्मल्यप्राप्तेर्धन्यमस्तु त्वद्रूपतयैव स्फुरतु ॥

---

१. 'मूलं' ख. २. 'अशेषान्' ख. ३ 'जगत' ख. ४ 'अस्माकं' ख.

या पन्थानं दिशति शिशिराद्युत्तरं देवयानं
या वा कृष्णं पितृपथमथो दक्षिणं प्रावृडादम् ।
ताभ्यामन्या विषुवदभिजिन्मध्यमा कृत्यशून्या
धन्या काचित्प्रकृतिपुरुषावन्तरा मेऽस्तु वृत्तिः ॥ ४९ ॥

प्रकृतिपुरुषौ वामदक्षिणनाडी अन्तरा तन्मध्ये काचिदनामान्या धन्या [illegible] मे वृत्तिः स्थितिरस्तु । कीदृशी । विषुं व्याप्तिमर्हतीति विषुवत् । अभिजयति द्वैतप्रपञ्च- [illegible] वर्तत इत्यभिजित् । मध्ये [illegible] मध्यमा । [illegible] त्वात्कृत्यैः [illegible] कार्यैः शून्या । तथा देवप्रीतिकारित्वाद्देवयानं [illegible] दयानं [illegible] शिशिरवसन्तग्रीष्म[illegible]मुत्तरायणं वा प्राणाख्या [illegible]र्दिशति प्रथयति, या वा अपानाख्या [illegible] प्रावृडादे- [illegible] दक्षिणं पन्थानं दक्षिणायनं [illegible] कृष्णं पितृप्रीतिहेतुत्वात्पितृपथं दि- शति ताभ्यामन्या व्यतिरिक्ता जीवन्मुक्तिप्रदा । [illegible] । [illegible] इदः [illegible] ॥

स्थित्वा किंचिन्मन इव पिबन्सेतुबन्धस्य मध्ये
प्राप्योपेयं ध्रुवपदमथो व्यक्तमुद्घाट्य तालु ।
सत्यादूर्ध्वं किमपि परमं व्योम सोमाग्निशून्यं
गच्छेयं त्वां सुरपितृगती चान्तरा ब्रह्मभूतः ॥ ५० ॥

सुरपितृगती अन्तरा ऊर्ध्वाधःप्रवेशात्मनिर्गतिदेवपितृमार्गयोर्मध्ये [illegible] ब्रह्मभूतः [illegible] प्राप्तस्त्वां गच्छेयं परतत्त्वात्मचिदेकरूपः स्याम् । कीदृशीं त्वाम् । सत्यादिभ्यस्ताप्रदात्मा[illegible] ऊर्ध्वमुत्कृष्टं प्रकाशानन्दैकघनं किमपि परमं व्योमेत्यनुत्तरचिदाकाशरूपं सोमाग्निशून्यं प्रशान्तप्राणापानसंस्कारम् । किं कृत्वा । तालु [illegible] कृत्वा । [illegible] निर्भिद्य । अथो अनन्तरं ध्रुवपदं प्राप्य [illegible] । सेतुबन्ध- स्य मध्य इति [illegible] किंचिन्मनः पिबन्निव [illegible] मनःसंस्कारं प्रशमयन् ॥

सर्वात्मत्वं सवितुरिति यो वाङ्मनःकायबुद्ध्या
रागद्वेषोपशमसमतायोगमेवारुरुक्षुः ।

---

१. 'त्वन्तरा' ख.

धर्माधर्मप्रसनरशनामुक्तये युक्तियुक्तां
स श्रीसाम्बः स्तुतिमिति रवेः स्वप्रशान्तां चकार ॥ ५१ ॥

श्रयन्त्येतां योगिन इति श्रीस्तया मोक्षलक्ष्म्या सहितः साम्बो भगवद्वासुदेवसुत इत्येवंरूपां रवेश्चिदर्कस्य स्तुतिं स्वप्रशान्तामात्मविश्रान्तिपरामकरोत् । 'सुप्रतिष्ठां' इति वा पाठः। कीदृशीं स्तुतिम्। युक्त्या परस्वरूपविश्रान्त्यात्मना योगेन युक्ताम् । तत्त्वापयित्रीमित्यर्थः । स इत्यस्य विषयं दर्शयति—यः सवितुर्विश्वकारणस्य चिद्भानोः सर्वात्मत्वं वैश्वरूप्यमेव योगमेकत्वमिच्छति । 'वस्तुनोऽन्येन वस्तुना' इत्याम्नायदृशा योगं परैक्यमित्युक्तदृशारोढुमिच्छुः स्वीचिकीर्षुः । न त्वन्यत्किंचित् । कीदृशं योगम् । सर्वदोषमूर्धन्ययो रागद्वेषयोरुपशमे सति या समता साम्यं तद्रूपम् । केन । वाङ्मनःकायसहितया बुद्ध्याध्यवसायेन । किमर्थमिमां स्तुतिमकरोदित्याह—धर्माधर्माभ्यां यद्ग्रसनमर्थादबुद्धस्य जगतस्तदेव रशना बन्धनरज्जुस्तस्या मुक्तये । एतत्स्तोत्रपाठावमर्शाभ्यां जना जीवन्मुक्तिमायान्त्वित्याशयादित्यर्थः ॥

भक्तिश्रद्धाद्यखिलतरुणीवल्लभेनेदमुक्तं
श्रीसाम्बेन प्रकटगहनं स्तोत्रमध्यात्मगर्भम् ।
यः सावित्रं पठति नियतं स्वात्मवत्सर्वलोका-
न्पश्यन्सोऽन्ते व्रजति शुकवन्मण्डलं चण्डरश्मेः ॥ ५२ ॥

इदमध्यात्मगर्भं क्रोडीकृतरहस्यम, प्रकटं बाह्यार्थदृशा, गहनं चाध्यात्मकार्थयोगात्, सावित्रं चिद्भानुसंबन्धि स्तोत्रं श्रीसाम्बेनोक्तं यः कश्चित्स्वात्मानमिव सर्वलोकान्पश्यंश्चिदभेदात्मविश्वं स्तोत्रार्थं भावयन्नियतं निश्चयेन पठति अनवरतं विशशति, सोऽन्ते चण्डरश्मेर्द्वैतग्रासिनश्चिदर्कस्य मण्डलं लीढविश्वसमरसीभूतमरीचिचक्रमेति । तन्मयो जायते । शुकवद्भगवद्व्याससुतवत् । कीदृशेन साम्बेन । भक्तिश्रद्धे आदी यासां तत्त्वार्थचिन्तादीनां ता एवाखिलास्तरुण्यो नवनवाः सुन्दर्यस्तासां वल्लभेन क्षणमपि परिहर्तुमशक्येन प्रेयसा । न तु रूपलावण्यातिशयमात्रात्समस्तबाह्यरमणीस्पृहणीयेन । इत्यनेन व्यतिरेकलभ्येनार्थेन भगवद्वासुदेवसुतत्वमात्मनः प्रकटयति ॥

उपसंहारभङ्ग्या जनाननुजिघृक्षुराशास्ते—

इति परमरहस्यश्लोकपञ्चाशदेषा
तपननवनपुण्या सागमब्रह्मचर्चा ।
हरतु दुरितमसद्वर्णिताकर्णिता वो
दिशतु च शुभसिद्धिं मातृवद्भक्तिभाजाम् ॥ ५३ ॥

---

१. 'रसना' ख. २. 'पञ्चाशिकैषा' क. ३ 'जपन' ख. ४ 'सुखसिद्धिं' ख.

इत्युत्क्रमान्महारहस्यार्थयुक्ता 'स्थित्वा किञ्चिन्नत इव पिबन्' इत्यन्तश्लोकानां पञ्चाशद्देशा तपनस्य विश्वविचित्रावभासितप्रकाशस्य भगवतश्चिदर्कस्य स्तवनेन स्तुता पुण्या पवित्रा । तथा सागमा विश्वोपनिषद्रूपमाहेश्वरशास्त्रार्थतत्त्वगर्भा तद्वाचको परा-द्वयविमर्शो यस्यां तादृशी अस्मद्दर्शिता सती आकर्णिता वो युष्माकं सर्वेषां दुरितं दुरन्तु किल्बिषं दुरन्त्यपायं च नाशयतु । भक्तिभाजां च शुभसिद्धिं दिशतु भवतां मोक्षमो-दाक्षश्री पदमयतामिति शिवम् ॥

कश्चिच्छैवः परशिवगमावेशगाढानुरागो-
द्रेकस्फूर्जत्प्रतिभनवपदन्यासवैचित्र्यशाली ।
सत्कोऽग्रेऽस्मिन्विवृतिरचनां क्षेमराजो व्यधुद्दे-
खेलमेवं प्रकटितं पठितं दर्शनीयं हि सद्भिः ॥

इति महामाहेश्वराचार्यवर्यश्रीमदभिनवगुप्तपादपद्मोपजीविराजानकश्रीक्षेमराजप्रणीत-विवृतिसमेता श्रीसाम्बपञ्चाशिका समाप्ता ।

समाप्तोऽयं ग्रन्थः ।

निर्णयसागरेऽङ्कितानि विक्रेयसंस्कृतपुस्तकानि ।

चरकसंहिता ।

अग्निवेशमहर्षिकृता, चरकप्रतिसंस्कृता, चक्रपाणिदत्तप्रणीतया आयुर्वेददीपिकाव्याख्यया समलंकृता ।

मूल्यं ८ रूप्यकाः, मार्गव्ययः १ रूप्यकः ।

सर्वेष्वायुर्वेदनिबन्धेष्वयं ग्रन्थो महत्त्वेन प्राधान्येन च वरीवर्ति । प्राचीनस्यास्यातिगाम्भीर्येण दुरवगाहत्वात्सर्वेषामध्ययनाध्यापनयोरतीवासौकर्यमासीत् तन्मार्जनार्थं प्रयतमानैरस्माभिर्महता प्रयत्नेनोपरि निदर्शितनाम्नी व्याख्या लब्धा तां भिषग्वरद्वारा संयोज्य संशोधय्य च प्रकाशितास्ति ।

मीमांसाशास्त्रसारः ।

(निवीतान्तमीमांसासिद्धान्ततत्त्वार्थप्रकाशः)

मूल्यं १ रूप्यकः, मार्गव्ययः ४ आणकाः ।

अधीतेष्वपि बहुग्रंथेष्ववसरे कस्यापि निर्णयो यथावन्मीमांसाज्ञानमंतरा दुःशक एव । प्रायः पूर्वमीमांसोत्तरमीमांसयोर्ज्ञानमतीव दुरवगममेवास्तीति व्युत्पित्सवोत्र विषये प्रवेशाभावादत्यन्तमुदासते तेन संप्रति मीमांसाशास्त्रं नामशेषमिव बभूव । अतोऽत्र सहजप्रवेशेन तत्प्रावण्यार्थमयं ग्रन्थो वेदान्तविशारदबिरुदेन अनन्तकृष्णशास्त्रिनाम्ना सुलभया रीत्या विरचितोस्ति ।

भाट्टदीपिका ।

महामहोपाध्यायसर्वतन्त्रस्वतन्त्रखण्डदेवप्रणीता श्रीशम्भुभट्टप्रणीतप्रभावलीव्याख्या

(निवीतान्तो भागः १)

मूल्यं ६ रूप्यकाः, मार्गव्ययः १ रूप्यकः ।

अखिलेष्वपि वाङ्मयेषु सुप्रसिद्धानां षड्दर्शनानामेव सिद्धेपि महत्त्वे मीमांसादर्शनमेव तेषूच्चपदमारोहति । भाट्टसांप्रदाये प्रणीतमीमांसानिबद्धसिद्धान्तानूहापोहैः खण्डदेवेनात्रैव समीचीनतया समावेशः कृतोस्ति । अग्रे च तच्छात्रेण शंभुभट्टेन प्रभावलीनाम्न्या मूलग्रन्थादर्शरूपया सनाथीकृत्यायं ग्रन्थोस्माभिर्मुद्रितोस्ति ।

पाण्डुरङ्ग जावजी,
निर्णयसागरयन्त्रालयाधिपतिः ।

Sāmba, son of Vāsudeva
Sāmbapañcāśikā
2 Samskarana